सं० सं० वि० वि० परीक्षासु निर्धारितस्य

श्रीमद्गदाधरभट्टाचार्यप्रणीतव्युत्पत्तिवादस्य

कठिनस्थलव्याख्याभूतो

व्युत्पत्तिवादप्रकाशः

श्रीमद्भर्तृहरिप्रणीतवाक्यपदीयब्रह्मकाण्डस्य च

वाक्यपदीयप्रकाशः

[प्रश्नोत्तरात्मकः]

व्याख्याकारः

श्रीहनुमान् शास्त्री

व्याकरणन्यायायुर्वेदाचार्यः,

एम्० ए०, बी० एड०, साहित्यरत्नम्,

हरद्वारस्थभगवानदाससंस्कृतमहाविद्यालये

व्याकरणविभागाध्यक्षः

सम्पादकः

स्वामी द्वारिकादासशास्त्री

व्याकरण-पालि-साहित्य-बौद्धदर्शनाचार्यः

वाराणसी

१९८१

B-3

सं० सं० वि० वि० परीक्षासु निर्धारितस्य

श्रीमद्गदाधरभट्टाचार्यप्रणीतव्युत्पत्तिवादस्य

कठिनस्थलव्याख्याभूतो

व्युत्पत्तिवादप्रकाशः

श्रीमद्भर्तृहरिप्रणीतवाक्यपदीयब्रह्मकाण्डस्य च

वाक्यपदीयप्रकाशः

[प्रश्नोत्तरात्मकः]

व्याख्याकारः

श्रीहनुमान् शास्त्री

व्याकरणन्यायायुर्वेदाचार्यः,

एम्० ए०, बी० एड०, साहित्यरत्नम्,

हरद्वारस्थभगवानदाससंस्कृतमहाविद्यालयस्य

व्याकरणविभागाध्यक्षः

सम्पादकः

स्वामी द्वारिकादासशास्त्री

व्याकरण-पालि-साहित्य-बौद्धदर्शनाचार्यः

वाराणसी

१९८१

प्रकाशक :
श्री हनुमान् शास्त्री
श्रीदादूबाग,
पो० कनखल,
जि० सहारनपुर

सर्वाधिकार लेखकाधीन

प्रथमावृत्ति :
मूल्य : ५ रु० मात्र

मुद्रक :
शिवप्रसाद रस्तोगी,
गौरीशंकर प्रेस,
मध्यमेश्वर, वाराणसी

सम्पादकीयम्

नैयायिकधुरन्धरश्रीमद्वामाचरणभट्टाचार्याणां साक्षाच्छिष्यत्व-मादधाना अप्युपासितानेकविद्यागुरवो विद्याभूषणपण्डितश्रीरामचन्द्र-शास्त्रिचरणाम्बुजचञ्चरीकाः, राजस्थानप्रदेशे जयपुरमण्डलान्तर्गतदौलत-पुरकोटडाग्रामवास्तव्याः, साम्प्रतं हरद्वारे भगवानदाससंस्कृतमहाविद्या-लये व्याकरणविभागाध्यक्षपदमलंकुर्वाणा अस्मत्तीर्थ्याः दादूपथपरि-व्राजकाः स्वामिश्रीहनुमान्शास्त्रिणः अनेकविश्वविद्यालयेषु आचार्य-परीक्षायां पाठ्यविषयत्वेन निर्धारितस्य श्रीमद्गदाधरभट्टाचार्यप्रणीतस्य व्युत्पत्तिवादग्रन्थरत्नस्य, भर्तृहरिप्रणीतस्य वाक्यपदीयस्य च, तत्परीक्षाब्धिं तितीर्षूणां श्रीटङ्कराजपाण्डेय-द्विजेशकुमारप्रभृतिप्रेष्ठच्छात्राणामनुरोधेन तेषां हिताय सुखाय च, परीक्षोपयोगीनि स्थलानि प्रश्नोत्तररूपेण प्रकाशनाम्ना साधु व्याख्यातवन्तः ।

शास्त्रिवर्याणामनेन कुशलकर्मणा न केवलं छात्रा एवोपकृता भवि-ष्यन्ति, अपितु येऽध्यापका अन्यकार्यव्यासक्ताश्छात्रान् आसन्नं न पाठित-वन्तः, तेऽप्यस्या व्याख्यायाः साहाय्येन ग्रन्थमिमं न चिरेणानायासमेव पाठयितुं प्रभवेयुरिति छात्राध्यापकोभयहितं विदधत इमे शास्त्रिवर्या समेषां विदुषां साधुवादार्हा स्युरिति विश्वसिति—

२५-१२-८०
वाराणसी

स्वामी द्वारिकादासशास्त्री,
वाराणसेयबौद्धभारतीपरिषदोऽध्यक्षः

विश्वविश्रुतवैदग्ध्यानां सर्वतन्त्रस्वतन्त्राणां
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
कुलपतिपदमलङ्कुर्वतां
पण्डितप्रवरश्रीबदरीनाथशुक्लमहाभागानां

शुभाशंसनम्

श्रीहनुमान् शास्त्री मे चिरपरिचितः। अनेन वाराणस्यामवस्थाय साहित्यव्याकरणयोर्दर्शनानां च विशिष्टविदुषां सकाशे तानि तानि शास्त्राणि विधिवदधीतानि। साम्प्रतमेष हरिद्वारे 'भगवानदाससंस्कृत-महाविद्यालय' इत्येतन्नाम्नि शिक्षासंस्थाने बहुभ्यो वर्षेभ्यो व्याकरणा-ध्यक्षपदं प्रसाधयति। श्रीशास्त्रिणोऽध्यापन इव विशिष्टग्रन्थानां टीका-टिप्पण्यादिप्रणयनेऽपि पर्याप्ताऽभिरुचिर्वर्तते। तत्फलतयैवानेन श्रीमद्गदा-धरभट्टाचार्यप्रणीतस्य व्युत्पत्तिवादस्य श्रीमद्भर्तृहरिप्रणीतस्य वाक्य-पदीयस्य च कतिपयेषु स्थलेषु कियतीष्टिप्पणीर्निर्माय ताः प्रकाशयितुं सन्नह्यते। एतदीयः सन्नाहः सफलो भवेत्, जिज्ञासूनां विदुषां च मन-स्तोषाय कल्पेत चेति कामयते—

१०-७-७९

बदरीनाथशुक्लः

शब्दशास्त्रेऽधिगतयाथातथ्यानां, कवीन्द्राणां,

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

व्याकरणविभागाध्यक्षाणां,

वेदवेदाङ्गसङ्कायाध्यक्षाणां च

डॉ० कालिकाप्रसादशुक्लमहोदयानां

शुभसम्मतिः

समवलोकितो मया हरद्वारे भगवान्दाससंस्कृतविद्यालये व्याकरण-विभागाध्यक्षेण श्रीहनुमच्छास्त्रिणा प्रणीतो वाक्यपदीयप्रकाशसहितो व्युत्पत्तिवादप्रकाशः। अत्र श्रीशास्त्रिणा भट्टाचार्यमहाभागानां भर्तृहरि-पादानां च हृदयं सरलया प्राञ्जलया च भाषया स्पष्टं समुपदर्शितम्। 'नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते' इत्यभियुक्तोक्त्यनुसारं छात्रहिताय सत्यपि संक्षेपे, शास्त्रमर्यादाप्यत्र तथैवाक्षुण्णा। अनेन नितरां प्रसीदति मे मन इति—

मकरसंक्रान्तिः २०३७
सं० सं० वि० वि०,
वाराणसी—२

कालिकाप्रसादशुक्लः

व्याख्यातप्रश्नसूची

(१) व्युत्पत्तिवादप्रकाशे

क्रमः	प्रश्नः	पृष्ठाङ्कः
१	प्रश्नः—'शाब्दबोधे चैकपदार्थः' इत्यादिवाक्यस्य प्रतिपदार्थ-पूर्वकः कीदृशोऽर्थः ? स्पष्टीक्रियताम् ।	१
२	प्रश्नः—'साजात्यं च विभक्तिविभाजकप्रथमात्वादिना', अत्र विभक्तिविभाजकत्वं कीदृशं भट्टाचार्यस्याभिप्रेतम् ?	३
३	प्रश्नः—समानवचनकत्वं तथा परिष्क्रियतां यथा 'वेदाः प्रमाणम्' इत्यत्र तत्प्रसक्तिर्न स्यात् ?	३
४	प्रश्नः—व्रीहित्वजातौ व्रीहिपदोत्तरसुवर्थैकत्वान्वययोगस्य नैरर्थक्ये शङ्कासमाधाने कीदृशे ?	४
५	प्रश्नः—समासव्याससाधारणीमाकाङ्क्षां निर्वर्ण्य निराकुरुत ?	५
६	प्रश्नः—'नीलस्य घटः' इति वाक्यतो नीलघटयोरभेदान्वयबोधापत्तिः परिहरणीया ?	६
७	प्रश्नः—अभेदं निरुच्य तस्य विभक्त्यर्थत्वं न वेति परीक्ष्यताम् ?	८
८	प्रश्नः—भावकृतां सार्थकत्वमसार्थकत्वं वेति विशदं विविच्यताम् ?	१०
९	प्रश्नः—'घटो घटः' इति वाक्यादभेदान्वयबोधमापाद्य तत्परिहारः क्रियताम् ?	१२
१०	प्रश्नः—'राजा पुरुषः' इति वाक्यात् 'राज्ञः पुरुषः' इति वाक्यादिव कुतो नान्वयबोध इति स्पष्टीक्रियताम् ?	१५

क्रमः	प्रश्नः	पृष्ठाङ्कः
११	प्रश्नः—'राज्ञः पुरुषः' इति वाक्यजे बोधे स्वत्वस्य संसर्गतया प्रकारतया वा भानमिति सुस्पष्टं निरूप्यताम् ?	१७
१२	प्रश्नः—'राजपुरुषः' इति वाक्यजे शाब्दबोधे स्वत्वस्य संसर्गतया भानस्वीकारे लाघवेन तत्र राजपदस्य राजसम्बन्धिनि लक्षणाभ्युपपमस्य औचित्यं कथं समर्थनीयम् ?	१९
१३	प्रश्नः—मतान्तरं निरस्य संख्याया विभक्त्यर्थत्वं युक्त्योपपाद्य सिद्धान्तपक्षः स्फुटीकर्तव्यः ?	२०
१४	प्रश्नः—द्वित्वस्य प्रत्यक्षसाधारण्यस्य दुर्वारया घटाकाशगत-द्वित्वस्य आकाशे सत्त्वेन 'आकाशौ' इति प्रयोगस्य कुतो न प्रामाण्यम् ?	२२
१५	प्रश्नः—पर्याप्तिसाधकां युक्तिं लिखित्वा एकैकधवखदिरतात्पर्यकस्य 'धवखदिरौ' इति प्रयोगस्य प्रामाण्यमुपपाद्यताम् ?	२४
१६	प्रश्नः—एकघटेऽपि द्वित्वस्य दुर्निवारतयाऽत्र गेहे एकघटत्वदशायाम् 'अत्र गेहे घटौ स्तः' इति प्रयोगस्य प्रामाण्यापत्तिः परिहृियताम् ?	२५
१७	प्रश्नः—मणिकृद्बोधितिकृतामतभेदप्रदर्शनपुरःसरं 'चैत्रो जानाति' इत्यत्र आश्रयतायाः संसर्गता प्रकारता वेति विशदं विविच्यताम् ?	२६
१८	प्रश्नः—आख्यातैकवचनस्य संख्यार्थकत्वं न वेति निरूप्य तस्य संख्यानाथकत्वाभावे न्यायमते कर्तृकर्मपदोत्तरं तृतीयादिनियामकं निर्मलं निरूपयत ?	२७
१९	प्रश्नः—धात्वर्थविषये विवदमानयोः प्राचीननवीनयोर्मते संक्षेपेण पृथगुपपाद्य फलावच्छिन्नव्यापारे फलव्यापारयोर्वा खण्डशः शक्तिः स्वीकरणीयेति लेख्यम् ?	२८

क्रमः	प्रश्नः	पृष्ठाङ्कः
२०	प्रश्नः—'घट आकाशं न पश्यति' इति वाक्यात् कीदृशोऽन्वयबोधः कथं जायते ? इति विशदमुच्यताम् ।	३०
२१	प्रश्नः—तृतीयाद्वितीयानियामकं तथा निर्वाच्यं यथा 'पक्वानि भुङ्क्ते चैत्रः', 'ओदनः पक्त्वा भुज्यते' इत्यादौ चैत्रौदनपदोत्तरं तृतीयाद्वितीययोः प्रसक्तिः, 'चैत्रेण दृश्यमानं घटं मैत्रः पश्यति' इत्यत्र घटपदोत्तरं द्वितीयाया अनुपपत्तिश्च न स्याताम् ?	३२
२२	प्रश्नः—धात्वर्थतावच्छेदकफलाश्रयत्वरूपकर्मत्वस्य कर्तृसाधारण्येन चैत्रः स्वं गच्छतीति प्रयोगस्य कुतो न प्रामाण्यम् ? विहगो विहगं गच्छतीति प्रयोगश्चापाद्य निराक्रियताम् ?	३३
२३	प्रश्नः—ध्राधातुसमभिव्याहृतद्वितीयाया अर्थो निरूप्यताम् ?	३४

(२) वाक्यपदीयप्रकाशे

१	प्रश्नः—धर्मस्यागमेतरविषयत्वम्, आर्षज्ञानस्यानुमानाद्यबाध्यत्वं च वाक्यपदीयरीत्या व्यवस्थाप्यताम् ?	३५
२	प्रश्नः—'स्वं रूपम्' इति सूत्रमुपजीव्य संज्ञासंज्ञिभावे हेर्युक्ताः पक्षाः प्रदर्शनीयाः ?	३६
३	प्रश्नः—ध्वनिना स्फोटस्य ग्रहणाय के के संस्क्रियन्ते इति सदृष्टान्तमुपपाद्यताम् ?	३७
४	प्रश्नः—ध्वनेः स्फोटस्य च व्यधिकरणत्वात् व्यञ्जकदीपगतधर्माणां व्यङ्ग्ये घटादावनुपलब्धेश्च प्राप्तो व्यङ्ग्यव्यञ्जकभावाभावो निरस्यताम् ?	३८
५	प्रश्नः—भर्तृहरिसम्मतानि प्रमाणानि निर्दिश्य तेषु कतमस्य प्राबल्यमिति वाक्यपदीयवाक्योपन्यासेन निरूपणीयम् ?	३९

॥ श्रीसद्गुरुभ्यो नमः ॥

व्युत्पत्तिवादप्रकाशः

प्रणम्य श्रीगुरुं दादुं ब्रह्मर्षिं करुणाकरम् ।
दीक्षागुरुं रामरत्नं प्रणतोऽस्मि पुनः पुनः ॥ १ ॥

विद्याभूषणश्रीरामचन्द्रस्याङ्घ्रिद्वयं हृदि ।
निधाय कुर्वे विषमग्रन्थिभेदपटीयसीम् ॥ २ ॥

व्युत्पत्तिवादे छात्राणां परीक्षोत्तरणे तरिम् ।
प्रकाशं हनुमान् शास्त्री व्याख्यां छात्रहितैषिणीम् ॥ ३ ॥

१ प्रश्नः—'शाब्दबोधे चैकपदार्थः' इत्यादिवाक्यस्य प्रतिपदार्थपूर्वकः कीदृशोऽर्थः ? स्पष्टीक्रियताम् ।

अत्र 'एकपदार्थः' इत्यत्र सप्तम्यर्थोऽनुयोगित्वप्रतियोगित्वान्यतररूपः, अपरपदार्थस्येत्यत्र षष्ठ्यर्थोऽप्यनुयोगित्वप्रतियोगित्वान्यतररूपः, 'शाब्दबोधे' इत्यत्र सप्तम्यर्थो निरूपितत्वम्, तस्य च संसर्गपदार्थैकदेशे संसर्गतायामन्वयः । मर्यादाशब्दार्थ आकाङ्क्षाप्रयोज्यसंसर्गतारूपः । तृतीयार्थोऽभेदः, तस्य च भास्यधात्वर्थीभूतविषयतायामन्वयः । आख्यातार्थ आश्रयत्वम्, तस्य च स्वरूपसम्बन्धेन प्रथमान्तार्थे संसर्गेऽन्वयः । तथा च शाब्दबोधनिरूपितैकपदार्थप्रतियोगिकापरपदार्थानुयोगिकसंसर्गतावान् संसर्ग आकाङ्क्षाप्रयोज्यसंसर्गत्वाभिन्नविषयताश्रयतावान् इत्यन्वयबोधः ।

असति बाधके उद्देश्यतावच्छेदकावच्छेदेनैव विधेयान्वयस्य दृष्टचरत्वात् अनुमितीयसम्बन्धे आकाङ्क्षाप्रयोज्यसंसर्गत्वाभिन्नविषयतावत्त्वरूपविधेयान्वयासम्भवात् शाब्दबोधनिरूपितत्वं संसर्गतायामुपात्तम् । शक्तिभास्यसंसर्गत्वाभिन्नविषयताश्रयत्वस्य एकपदार्थप्रतियोगिकापरपदार्थानुयोगिकसंसर्गे बाधात् आकाङ्क्षाप्रयोज्यसंसर्गतारूपो मर्यादापदार्थो वाच्यः ।

अथात्रैकत्वमपरत्वं च कुत्रान्वेति ?

न च पद एवैकत्वस्यापरत्वस्य चान्वयः, तथा च पदविशिष्टः संसर्ग इत्यर्थलाभात् न कोऽपि दोषः; वै० च स्वप्रयोज्यप्रकारताकत्वस्वभिन्नपद-प्रयोज्यविशेष्यताकत्वोभयसम्बन्धेनेति वाच्यम्, तथा सति पचतीत्यादौ एवपदस्थले च तिवर्थकृतिवर्तमानत्वयोरेवपदार्थान्ययोगव्यवच्छेदयोश्च स्वरूपसम्बन्धस्य प्रतियोगित्वस्य च लाभासम्भवापत्तेः, तिप्पदप्रयोज्य-वर्तमानत्वनिष्ठप्रकारताकत्वस्य स्वरूपसम्बन्धे सत्त्वेऽपि तादृशतिप्पद-भिन्नपदप्रयोज्यविशेष्यताकत्वस्य निरुक्तसंसर्गे विरहात्। एवमेवपद-स्थलेऽपि।

न चैकत्वमपरत्वं चार्थ एवान्वेति, तथा चार्थविशिष्टः संसर्गः; वै० च स्वनिष्ठप्रकारताकत्वस्वभिन्नार्थनिष्ठविशेष्यताकत्वोभयसम्बन्धेन, इत्यर्थ-लाभाददोष इति वाच्यम्; तथा सति नीलघटयोरभेदसम्बन्धस्यासंग्रहा-पत्तेः, तादृशसम्बन्धे नीलरूपार्थनिष्ठप्रकारताकत्वसत्त्वेऽपि नीलभिन्नार्थ-निष्ठविशेष्यताकत्वविरहाद् घटस्य नीलात्मकत्वात्।

न च पदार्थतावच्छेदक एवैकत्वस्यापरत्वस्य चान्वयः, तथा च पदार्थतावच्छेदकविशिष्टः संसर्गः; वै० च स्वावच्छिन्नप्रकारताकत्वस्व-भिन्नधर्मावच्छिन्नविशेष्यताकत्वोभयसम्बन्धेनेत्यर्थाददोष इति वाच्यम्; एवं सति सम्पन्नो व्रीहिरित्यत्रैकत्वव्रीहित्वयोः पर्याप्तिसम्बन्धस्यासंग्रहा-पत्तेः, एकत्वत्वावच्छिन्नप्रकारताकत्वस्य तादृशसम्बन्धे सत्त्वेऽपि स्व-भिन्नधर्मावच्छिन्नविशेष्यताकत्वस्य तत्र विरहाद् व्रीहित्वजातेः स्वरूपत एव व्रीह्यादौ प्रकारत्वात्, इति चेत् ? अत्र केचित्, उपस्थितिविशिष्टः संसर्ग आकाङ्क्षाप्रयोज्यसंसर्गत्वाभिन्नविषयतावान्—उपस्थितिवैशिष्ट्यं च स्वप्रयोजकवृत्तिविषयताप्रयोज्यविषयताकत्वस्वभिन्नोपस्थितिप्रयोजक-वृत्तिविषयताप्रयोज्यविषयताकत्वोभयसम्बन्धेन। तथा चाऽऽख्यातार्थ-वर्तमानत्वकृत्त्ववर्तमानत्वोपस्थितिप्रयोजकवृत्तिविषयताप्रयोज्यवर्तमानत्व-प्रकारताकत्वस्य वर्तमानोपस्थितिभिन्नकृत्त्वोपस्थितिप्रयोजकवृत्तिविष-यताप्रयोज्यकृतिविषयताकत्वस्य च स्वरूपसम्बन्धे सत्त्वात् स्वरूप-सम्बन्धस्य संग्रह इत्यदोष इत्याहुः। एतेन राज्ञो राजा राजराज इत्यादौ

वाक्ये समासे च समवायेनाभावो नास्तीत्यादौ च स्वस्वामिभावप्रतियोगित्वादीनां नासंग्रहः ॥

२ प्रश्नः—'साजात्यं च विभक्तिविभाजकप्रथमात्वादिना', अत्र विभक्तिविभाजकत्वं कीदृशं भट्टाचार्यस्याभिप्रेतम् ?

ननु विभक्तिविभाजकत्वं विभक्तित्वसामान्यधर्मावच्छिन्नानां प्रथमाद्वितीयातृतीयादीनां परस्परतृतीयात्वद्वितीयात्वप्रथमात्वविरुद्धव्याप्यधर्मिणां प्रथमाद्वितीयादेः प्रतिपत्त्यनुकूलव्यापारो विभागः, स च प्रथमा, द्वितीया इत्याद्युच्चारणरूपः, विभाजकधर्मश्च प्रथमात्वद्वितीयात्वादिरूप इति चेन्न; तथा सति सर्वनामस्थानत्वमादाय 'नीलं घटः' इत्यादावपि सर्वनामस्थानत्वेन समानविभक्तिकतयाऽभेदान्वयबोधापत्तेः ।

न च सर्वनामस्थानत्वं न विरुद्धम्, तस्य प्रथमायां द्वितीयायामपि सत्त्वादिति वाच्यम्; तथा सति प्रथमात्वद्वितीयात्वयोरपि विरुद्धत्वानुपपत्तेः, प्रथमाया औ, द्वितीयाया अपि औ इति द्वितीयात्वप्रथमात्वयोः समानाधिकरणत्वात् ।

न च प्रथमाया औ, द्वितीयाया औट् इति न द्वितीयात्वप्रथमात्वयोः सामानाधिकरण्यमिति वाच्यम्; एवमपि सर्वनामस्थानत्वस्य तृतीयात्वादिविरुद्धत्वेन वक्तुं शक्यत्वात् ।

वस्तुतो विभक्तिविभाजकत्वमत्र सुव्विभाजकत्वमेव वाच्यम् । तच्च सुप्त्वभिन्नत्वे सति सुप्त्वव्याप्यत्वे च सति सुप्त्वव्याप्यव्याप्यभिन्नो यः प्रथमात्वादिविशिष्टान्यो धर्मस्तद्रूपम् । वै० च स्वाश्रयवृत्तित्वस्वानाश्रयवृत्तित्वोभयसम्बन्धेन । तेन सर्वनामस्थानत्वमादाय 'घटं नीलः' इत्यादौ न नीलादेरभेदान्वयबोधः; सर्वनामस्थानत्वस्य प्रथमात्वविशिष्टत्वात् ॥

३ प्रश्नः—समानवचनकत्वं तथा परिष्क्रियतां यथा 'वेदाः प्रमाणम्' इत्यत्र तत्प्रसक्तिर्न स्यात् ?

अत्र 'यत्र यत्र विशेष्यवाचकपदत्वं विशेषणवाचकपदे तत्र तत्रैव समानवचनकत्वम्' इत्येव व्याप्तिर्वाच्या, वै० स्वोत्तरविभक्तितात्पर्य-

विषयसंख्याभिन्नसंख्यानिष्ठप्रकारतानिरूपितविशेष्यताप्रयोजकत्वस्ववृत्तित्वोभयसम्बन्धेन । वृत्तित्वमपि स्वोत्तरविभक्त्यर्थतावच्छेदकजात्यवच्छिन्नसंख्यानिष्ठप्रकारतानिरूपितविशेष्यताप्रयोजकत्वसम्बन्धेन । आद्यं स्वं विशेष्यवाचकं पदम्, द्वितीयं विशेषणवाचकपदपरम् । तेन रामदारा मैथिली, मैथिली रामदारा इत्यादौ नासमानवचनान्तताऽनुपपत्तिः ।

समानवचनकत्वं चात्र स्वोत्तरविभक्तिवृत्त्यानुपूर्वीमद्विभक्तिप्रकृतित्वरूपं बोध्यम् । स्वोत्तरविभक्तीत्यत्र विभक्तित्वेन विभक्त्यनिवेशे सम्पन्नालता, बह्व्यः सम्पत्तय इत्यादौ सम्पन्नालतापदोत्तरबहुपदार्थबहुत्वसंख्याभिन्नसंख्याया विवक्षितत्वात् असमानबचनान्तता स्यात्, अतो विभक्तित्वेन विभक्तिनिवेशः । विभक्त्यर्थनिवेशे वेदत्वगतैकत्वविवक्षायां 'वेदाः प्रमाणम्' इति वाक्यस्याप्रामाण्यं स्यात् तादृशविभक्त्यर्थविरुद्धसंख्याया अविवक्षितत्वात् ॥

४ प्रश्नः—व्रीहित्वजातौ व्रीहिपदोत्तरसुबर्थैकत्वान्वयोपगमस्य नैरर्थक्ये शङ्कासमाधाने कीदृशे ?

यत्तु व्रीहित्वरूपजातौ व्रीहिपदोत्तरसुबर्थैकत्वस्यान्वयाभ्युपगमो निरर्थकः, सम्पन्नो व्रीहिरिति वाक्यघटकव्रीहिपदेन नानाव्रीहिपदार्थस्योपस्थित्या प्रत्येकपदार्थे सुबर्थनानैकत्वस्यान्वये बाधकाभावात् इति मतम्, तन्मन्दम्; व्रीहिसजातीयनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वमेव सुबेकवचनस्यार्थो वाच्यः, अन्यथा द्वयोः पुरुषयोर्न्यायाणां पुरुषाणामपि प्रत्येकमेकत्वस्याबाधिततया द्विबहुस्थलेऽपि एकवचनप्रयोगस्य साधुताया अवर्जनीयतापत्तेः । एवं च तत्तद्व्रीहिनिष्ठतत्तदेकत्ववान्न इत्याकारकभेदप्रतियोगितावच्छेदकताया एवैकत्वे सत्त्वात् तादृशभेदप्रतियोगितानवच्छेदकत्वस्य नानैकत्वे विरहान्नानैकत्वस्य सुबेकवचनार्थताया असम्भवात् । 'पशुना रुद्रं यजेत' इत्यादावपि बहुपशुकरणकयागाददृष्टसिद्धिः स्यात्; प्रत्येकपशौ तृतीयैकवचनार्थस्य नानैकत्वस्याबाधितत्वात् । स्वसजातीयनिष्ठेत्यादिरीत्या एकवचनार्थत्वाभ्युपगमे तु न बहुपशुकरणक-

यागाददृष्टसिद्धिः। केवलपशुनिष्ठभेदप्रतियोगितावच्छेदकत्वस्य नानैकत्वे सत्त्वेऽपि यागकरणतासंसर्गित्वविशिष्टपशुत्ववन्निष्ठभेदप्रतियोगितानवच्छेदकतायास्तत्पशुनिष्ठैकत्वे सत्त्वात्। अत एवाक्तं भट्टाचार्येण—साजात्यं च स्वसमभिव्याहृतपदार्थसंसर्गित्वविशिष्ट प्रकृत्यर्थतावच्छेदकवत्त्वरूपेण। स्वं प्रकृत्यर्थः, तत्समभिव्याहृतत्वं च पदे, तच्च स्वविषयताप्रयोजकपदसमभिव्याहृतत्वम्, तद्विशिष्टं यत्पदं तदर्थसंसर्गितविशिष्टप्रकृत्यर्थतावच्छेदकवत्त्वं प्रकृत्यर्थे स्वस्मिन् इत्येवं निरुक्तग्रन्थतात्पर्यम्। अत्र संसर्गित्वपर्यन्तमात्रस्य साजात्यविवक्षणे यागकरणतासम्बन्धित्वस्य यागकरणतायामपि सत्त्वात् तन्निष्ठभेदप्रतियोगितावच्छेदकतायास्तत्पशुनिष्ठैकत्वे विद्यमानतया 'पशुना यजेत' इत्यादौ पशुपदोत्तरमेकवचनं न स्यात्। अतः प्रकृत्यर्थतावच्छेदकवत्त्वपर्यन्तानुसरणम्।

यथा स्थीयते, भूयते इत्यादावेकत्वं न विवक्षितं तथाप्येकवचनमेव भावाख्यातस्थले साधु भवति न द्वित्वादिकमपि भावाख्यातस्थले प्रयुज्यते; तथा सम्पन्नो व्रीहिरित्यत्रापि व्रीहिपदोत्तरविभक्तिः साधुत्वार्थिकैव, तत्र विभक्तेरेकत्वाद्यर्थस्याविवक्षितत्वेऽपि 'नापदं प्रयुञ्जीत' इति स्मरणादेकवचनान्तं व्रीहिपदं वैदिकमिति मतमपि न समीचीनम्, भावाख्यातस्थले एकत्वस्य निरर्थकतायाः सर्वसम्मतत्वेऽपि सम्पन्नो व्रीहिरित्यादौ व्रीहिपदोत्तरसुबेकवचनस्य सार्थकत्वसम्भवेन तत्सार्थकतापरित्यागस्य कथामात्रेण कर्तुमशक्यत्वात्॥

५ प्रश्नः—समासव्याससाधारणीमाकाङ्क्षां निर्वर्ण्य निराकुरुत।

'नीलघटमानय' इत्यादिसमासस्थले नीलपदाव्यवहितोत्तरघटपदत्वरूपाकाङ्क्षायाः, 'नीलो घट' इत्यत्र च ससमानविभक्तिकघटादिपदसमभिव्याहृतनीलादिपदत्वरूपाकाङ्क्षायाश्च अभेदसम्बन्धेन नीलप्रकारकघटविशेष्यकशाब्दबोधं प्रति प्रयोजकत्वकल्पने प्रयोजकताया द्वैविध्यात् गौरवं स्यात्, अतः समासव्यासाधारण्या एकस्या एव आकाङ्क्षाया लाघवेन प्रयोजकता कल्पनीया। तथाहि—विशेष्यवाचकपदाप्रकृतिकविभक्त्यप्रकृतित्वं विशेषणवाचकपदे आकाङ्क्षा।

तादृशी आकाङ्क्षा नीलघटमानयेत्यत्र नीलपदे, नीलो घट इत्यत्र च प्रथमान्तनीलपदे वर्तत एव; घटपदाप्रकृतिकद्वितीयाविभक्त्यप्रकृतित्वस्य नीलपदे सत्त्वात्।

विशेष्यवाचकपदे विशेषणवाचकपदाप्रकृतिकविभक्त्यप्रकृतित्वं तु नाकाङ्क्षा; 'नीलघटमानय' इत्यादौ नीलादेर्घटादावन्वयबोधानुपपत्तेः, नीलपदाप्रकृतिकद्वितीयाविभक्तिप्रकृतित्वस्य घटे सत्त्वात्।

यदि च 'नीलो घटः' इत्यादौ नीलपदोत्तरसुविभक्तिर्घटपदोत्तरसुविभक्तितो भिन्ना इत्युच्यते, तर्हि स्वोत्तरावृत्तिविभक्तिविभाजकधर्मवद्विभक्त्यप्रकृतित्वमाकाङ्क्षा। (अत्र विभाजकपर्यन्तानिवेशे नीलपदोत्तरसुरूपतद्व्यक्तित्वस्य घटपदोत्तरावृत्तिधर्मतया तादृशधर्मवद्विभक्त्यप्रकृतित्वस्य नीलपदे विरहात् 'नीलो घटः' इत्यादौ शाब्दबोधानुपपत्तिः स्यात्।

न च तादृशधर्मवद्यत्तदप्रकृतित्वमेवोच्यतां किं विभक्तिपदेनेति वाच्यम्; नीलो घट इत्यादौ घटपदोत्तरावृत्तिविभक्तिविभाजकद्वितीयात्वस्य कालिकसम्बन्धेन सुपदेऽपि सत्त्वात्, तादृशसुपदाप्रकृतित्वस्य च नीलपदेऽसत्त्वात् शाब्दबोधानुपपत्तेः। अतो विभक्तिविभाजकतावटकसम्बन्धेन तादृशधर्मवत्त्वलाभार्थं विभक्तिपदम्। तथा च स्वरूपसम्बन्धेन द्वितीयात्ववत्त्वस्य सुविभक्तावसत्त्वान्न दोषः। अत्र धर्मपदमपि तदर्थमेव बोध्यम्, अन्यथा तादृशविभक्तिविभाजकवत्त्वस्यापि कालिकसम्बन्धेन सुविभक्तौ सत्त्वात् पूर्वदोषतादवस्थ्यं स्यात्।) तन्न समीचीनम्; विभक्तित्वमजानतः पुरुषस्य नीलो घटोऽस्तीति वाक्याच्छाब्दबोधानुपपत्तेः शास्त्रस्य व्युत्पन्नज्ञानप्रयोजनकत्वात्। एवं नीलस्य घट इत्यादौ षष्ठीविभक्तौ सुत्वभ्रमदशायां नीलाद्यभेदान्वयबोधो न स्यात्; घटपदाप्रकृतिकषष्ठीविभक्तिप्रकृतित्वस्य नीलपदे सत्त्वात्, नीलो घट इत्यत्र च सुपदेऽसुपदत्वभ्रमदशायां नीलाद्यभेदान्वयबोधापत्तेः; घटपदाप्रकृतिकविभक्त्यप्रकृतित्वस्य नीलपदे सत्त्वात्।

केचित्तु स्वोत्तरसुपदभिन्नपदानुत्तरत्वविविष्टस्वोत्तरत्वादिरूपस्वाव्यवहितोत्तरत्वसम्बन्धेन नीलादिपदविशिष्टस्वन्तघटादिपदत्वरूपैव

मतं तु न युक्तम्; पदार्थतावच्छेदकघटत्वघटयोर्यः सम्बन्धः समवायस्तत्र शक्ति विना घटे घटत्वस्य भानासम्भवाद्, भेदरूपपदार्थतावच्छेदकस्यापि नीलभेदत्वावच्छिन्नप्रतियोगितासम्बन्धे शक्त्यनभ्युपगमे तेन सम्बन्धेन भेदस्याप्यभावे भानासम्भवात्। तथा च नीलपदं व्यर्थं स्यात्।

सिद्धान्तस्तु भेदोऽभावश्च द्वयमेव विशेषणविभक्तेरर्थः। भेदे नीलपदार्थस्य नीलत्वावच्छिन्नप्रतियोगितासम्बन्धेनान्वयः। भेदस्य तु नीलभेदत्वावच्छिन्नप्रतियोगितासम्बन्धेनाभावेऽन्वयः। एवं चाकाङ्क्षाज्ञानप्रयोज्य एव निरुक्तसम्बन्धः।

अथैवं विशेषणविभक्त्यर्थस्य प्रकृत्यर्थान्वितभेदविशिष्टाभावस्वरूपस्य प्रकृत्यर्थतावच्छेदकनीलत्वादिस्वरूपतथा कम्बुग्रीवादिमत्त्वप्रमेयत्वादेर्विशेषणविभक्त्यर्थत्वसम्भवेन प्रमेयो घटः, कम्बुग्रीवादिमान् घट इत्यादौ प्रमेयत्वकम्बुग्रीवादिमत्त्वादेर्घटादावन्वयात् शाब्दबोधानुपपत्त्यसम्भवेऽपि नीलपटतात्पर्येण नीलघट इति वाक्यस्य प्रामाण्यापत्तिः, नीलभेदाभावस्य नीलत्वस्य घटपटोभयसाधारणत्वात्; किं च प्रमेयत्वकम्बुग्रीवादिमत्त्वादेर्विशेषणविभक्त्यर्थत्वमपि न सुसमाधेयम्, प्रमेयत्वे विशेषणविभक्त्यर्थे प्रमेयत्ववतः प्रमेयस्य प्रकृत्यर्थस्य स्ववृत्तित्वसम्बन्धेनान्वये निराकाङ्क्षत्वात्। साकाङ्क्षत्वे तस्य कर्म गच्छतीति घटवयस्य प्रामाण्यापत्तेर्दुर्वारता स्यात्। कर्मत्ववतः कर्मणः स्ववृत्तित्वतात्सम्बन्धेन द्वितीयार्थकर्मतायामन्वयं स्वीकृत्य तस्या अपि धात्वर्थीभूते गमनेऽन्वयसम्भवात्। अभेदस्य तत्तद्व्यक्तित्वावच्छिन्नभेदाभावरूपस्य संसर्गताभ्युपगमान्न नीलपटतात्पर्येण नीलघट इति वाक्यस्य प्रामाण्यम्, पदार्थशपटनिष्ठतद्व्यक्तित्वस्य घटे सम्बन्धताविरहात्। अभेदस्य प्रकारतात्वे तु तद्व्यक्तित्वावच्छिन्नभेदाभावरूपतद्व्यक्तित्वस्य विशेषणविभक्त्यर्थस्यान्वयाभ्युपगमे निरुक्तापत्तिवारणसम्भवेऽपि तत्प्रकारकबुद्धौ तज्ज्ञानस्य हेतुतयाऽपूर्वचैत्रादिनिष्ठतद्व्यक्तित्वस्य कथमपि पूर्वं ज्ञातुमशक्यत्वात् तादृशचैत्रः सुन्दर इत्यादौ शाब्दबोधानुपपत्तेर्वज्रलेपत्वात् संसर्गज्ञानस्य विशिष्टबुद्धावहेतुत्वेन तादृशतद्व्यक्तित्वस्य संसर्गताभ्युप-

गमेनापूर्वव्यक्तिविषयकाभेदान्वयबोधसम्भवात् इति चेत्, न; अभेदस्तादात्म्यमेव । तच्च स्वप्रतियोगिवृत्तित्वस्वानुयोगिवृत्तित्वोभयसम्बन्धेन भेदविशिष्टान्यतद्व्यक्तित्वरूपम् । तादृशभेदविशिष्टं प्रमेयत्वादिकम्,प्रमेयत्वस्य घटो नेत्याकारकभेदप्रतियोगिवृत्तित्वाद् भेदानुयोगिपटवृत्तित्वाच्च । तादृशप्रमेयत्वान्यत्वं च नीलघटादिनिष्ठतद्व्यक्तित्वे, तत्र च प्रकृत्यर्थस्य नीलादेराधेयतासम्बन्धेनान्वयः । तद्व्यक्तित्वस्य विभक्त्यर्थस्य च च घटादौ स्वरूपसम्बन्धेनान्वयः । तथा च नीलो घट इत्यादौ नीलनिष्ठतद्व्यक्तित्ववान् घट इत्यन्वयबोधः । निरुक्तभेदविशिष्टान्यत्वरूपसामान्यधर्मेण निखिलतद्व्यक्तित्वस्य ज्ञानसम्भवान्नापूर्वचैत्रनिष्ठतद्व्यक्तित्वस्य शाब्दबोधात् पूर्वमुपस्थित्यसम्भव इति नापूर्वचैत्रव्यक्तिमादाय सुन्दरश्चैत्र इत्याकारकशाब्दबोधानुपपत्तिः । अभेदस्य संसर्गतामतेऽपि ईदृशानुगततद्व्यक्तित्वसम्बन्धेन नीलादेर्घटादावन्वयः । नीलो घट इत्यादावननुगततद्व्यक्तित्वावच्छिन्नभेदाभावकूटस्य संसर्गत्वे नीलेऽपि घटे यत्किंचित्तादृशाभावमादाय न नील इत्याकारकबोधापत्तिः । तथा च 'प्रतियोग्यभावान्वयौ च तुल्ययोगक्षेमौ' इति मते नञो भेदबोधकत्वं न कुत्रापि सम्भवति । भावान्वयबोधे तद्व्यक्तित्वसम्बन्धेन नीलादेरेव घटादावन्वयात् 'घटो न नीलः' इत्यादावभावान्वयबोधे तादृशतद्व्यक्तित्वसम्बन्धेन नीलस्य घटादावभाव एव वाच्यः ॥

८ प्रश्नः—भावकृतां सार्थकत्वमसार्थकत्वं वेति विशदं विविच्यताम् ?

स्तोकः पाक इति प्रयोगदर्शनाद् घञादिप्रत्ययेन धातुना चैकस्यैव पाकस्योपस्थितिरभ्युपगन्तव्या । धातुमात्रेण पाकाद्युपस्थितौ पाकं पश्यतीत्यादौ द्वितीयार्थविषयककर्मतायां पाकादेरनन्वयप्रसङ्गः स्यात्, सुबर्थरूपप्रत्ययार्थे नामार्थस्यैव प्रकृत्यर्थस्यान्वयात् । धात्वर्थस्य सुब्विभक्तिप्रकृत्यर्थत्वासम्भवात् । घञन्तप्रकृत्येकदेशार्थस्य कर्मतायामन्वयाभ्युपगमे यत्र पाकादौ द्वित्वं वर्तते पाककर्तुश्चैकत्वं तत्र पचन्तौ पश्यतीत्याकारकप्रयोगापत्तिः; शत्रन्तप्रकृत्यर्थैकदेशे पाके द्वित्वस्य सुबर्थस्य सत्त्वात् । प्रकृत्येकदेशार्थधर्मिकसुबर्थान्वयबोधं प्रति धातूत्तरप्रत्ययधर्मिकैकिचि-

दर्थपरत्वज्ञानस्य प्रतिबन्धकत्वाभ्युपगमे महद् गौरवं स्यात्। एवं शोभनं पचनमित्यादौ अधिकरणार्थकल्युट्प्रत्ययस्थलेऽपि प्रकृत्येकदेशार्थे पाके शोभनादेरभेदान्वयबोधापत्तिः।

अथ यदि प्रकृत्येकदेशार्थे विभक्त्यर्थान्वयबोधो न स्वीक्रियते तदा उपकुम्भं पश्य, अर्धपिप्पलीं छिन्द्यादित्यादौ द्वितीयार्थकर्मतायां कुम्भसमीपपिप्पल्यर्धरूपप्रकृत्येकदेशार्थस्यान्वयबोधो न स्यादिति चेन्न; कुम्भपदस्य पिप्पलीपदस्य च कुम्भसमीपपिप्पल्यर्धादौ लक्षणास्वीकारात्, उपपदादेस्तादृशलक्षणार्थतात्पर्यग्राहकताया आवश्यकत्वात्। तथा च कुम्भपदस्यैव कुम्भसमीपार्थतया न समुदायैकदेशार्थस्य विभक्त्यर्थीभूतकर्मतायामन्वयः। एवं च घञन्तसमुदायस्यैव पाकाद्यर्थतया यदा घञ्प्रत्ययेन पाकाद्युपस्थितिस्तदैव स्तोकादीनां प्रथमान्तता। यदा तु धातुना पाकाद्युपस्थितिः तदा स्तोकादेः क्रियाविशेषणतया द्वितीयान्तता क्लीबता च; द्विविधस्यैव प्रयोगस्य दर्शनात्। स्तोकमोदनस्य पाकः, स्तोकः पाक इत्यादिप्रयोगस्य सर्वसिद्धत्वात्। तथा चोक्तं कातन्त्रपरिशिष्टकृता—कथं स्तोकः, पाकः? कृदन्तविशेषणत्वात्। धात्वर्थविशेषणत्वे तु स्तोकमोदनस्य पाक इति भवत्येव।

न चैवं स्तोकौ पचति, स्तोकान् पचतीत्यपि प्रयोगः स्यात्, स्तोकादेर्द्वित्वान्वये बाधकाभावादिति वाच्यम्; तदर्थकपदोत्तरविभक्त्या संख्याप्रकारकान्वयबोधं प्रति अभेदसंसर्गावच्छिन्नतदर्थविषयताशालिशाब्दसामग्र्या हेतुत्वस्य कल्पनीयत्वात्, स्तोकादिनिष्ठविषयताया अभेदसम्बन्धानवच्छिन्नत्वविरहेण तत्र द्वित्वादिसंख्यान्वयबोधासम्भवात्। एवं नीलो घट इत्यादावपि नीलपदोत्तरविभक्त्या न संख्यान्वयबोधः, नीलनिष्ठविषयताया अभेदसंसर्गावच्छिन्नत्वात्। भवति च घटादावेव संख्यान्वयः, तत्र घटनिष्ठविषयताया अभेदसंसर्गानवच्छिन्नत्वात्।

भट्टाचार्यास्तु 'स्तोकः पाकः' इति प्रयोगोपपत्तये सार्थकप्रत्ययान्तधातूपस्थाप्यार्थ एव विशेषणवाचकपदाद् द्वितीयेति सिद्धान्तं स्वीकृत्य घञादेर्निरर्थकत्वं वदन्ति।

स्तोकं स्थीयते इत्यादौ यदा वर्तमानत्वमविवक्षितं तत्रापि वर्तमानत्वप्रकारतानिरूपितस्थितिनिष्ठविशेष्यताप्रयोजकतावच्छेदकानुपूर्वी - मत्त्वस्य स्थाधातौ सत्त्वात् तदानीमपि सार्थकप्रत्ययान्तधातुपदेन स्थाधातोर्धर्तुं शक्यत्वात् ॥

६ प्रश्नः—'घटो घटः' इति वाक्यादभेदान्वयबोधमापाद्य तत्परिहारः क्रियताम् ?

घटत्वावच्छिन्नाभेदसंसर्गावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासम्बन्धेन द्रव्यत्वादौ प्रसिद्धस्य शाब्दबोधस्य घटत्वादावापत्तिरिति तु न युक्तम्; तादृशप्रसिद्धशाब्दबोधं प्रति द्रव्यपदजन्योपस्थितेर्द्रव्यत्वावच्छिन्ने घटत्वावच्छिन्नवत्ताज्ञानरूपयोग्यताज्ञानस्य जनकतया तादृशजनकीभूतोपस्थितियोग्यताज्ञानयोर्घटो घट इत्यादावभावात् ।

यद्यपि समवायेन शाब्दबोधं प्रत्येव निरुक्तोपस्थितेर्योग्यताज्ञानस्य च समवायेन हेतुतया निरुक्तविशेष्यतावच्छेदकतासम्बन्धेन शाब्दबोधं प्रति तयोर्हेतुत्वमेव नास्तीत्युच्यते, तथापि न निस्तारः; द्रव्यत्वनिष्ठावच्छेदकताकशाब्दबुद्धित्वेन रूपेण धर्मितावच्छेदकतासम्बन्धेन घटप्रकारकशाब्दबोधस्य द्रव्यत्वावच्छिन्नविशेष्यकसमवायेन कार्यीभूतशाब्दबोधस्य चोपादातुं शक्यतया तादृशशाब्दबोधोत्पत्तिमात्रं प्रत्येव द्रव्याद्युपस्थित्यादेर्हेतुताया आवश्यकत्वेन धर्मितावच्छेदकतासम्बन्धेन शाब्दबोधेऽपि तस्य हेतुत्वात् तदभावादेव 'घटो घटः' इत्यादौ शाब्दापत्तेरसम्भवात् ।

न च द्रव्याद्युपस्थितेर्धर्मितावच्छेदकतासम्बन्धेन शाब्दबोधजनकत्वेऽपि तस्याः शाब्दबोधाधिकरणे धर्मितावच्छेदके विरहाद् व्यभिचार इति वाच्यम्, स्वाश्रयात्मवृत्तित्वसम्बन्धेनोपस्थितियोग्यताज्ञानयोर्धर्मितावच्छेदके द्रव्यत्वे सत्त्वादिति तु नाशङ्कनीयम्; धर्मितावच्छेदकतासम्बन्धेन शाब्दबोधं प्रति धर्मितावच्छेदकतासम्बन्धेनैव योग्यताज्ञानस्य कारणत्वं वाच्यम्; अन्यथा धर्मितावच्छेदकतत्तद्धर्मं निवेश्य योग्यता-

ज्ञानस्य कारणत्वाभ्युपगमेऽनन्तधर्मभेदेन कार्यकारणभावस्यानन्त्यापत्तिः स्यात्, तदपेक्षया लाघवेनाभेदसम्बन्धावच्छिन्नघटत्वावच्छिन्नवत्ताज्ञानरूपयोग्यताज्ञानस्य धर्मितावच्छेदकतासम्बन्धेन घटत्वेऽपि सत्त्वेन तत्र तादृशसम्बन्धेन घटप्रकारकशाब्दबोधापत्तेर्वारयितुमशक्यत्वात् ।

अथैवं द्रव्यपदाद् द्रव्यानुपस्थितिदशायामपि द्रव्यत्वे घटस्याभेदेन शाब्दबोधः स्यात्, सामान्यतः शाब्दबुद्धित्वावच्छिन्नं प्रति द्रव्यपदजन्यद्रव्यत्वोपस्थितेर्हेतुत्वोपगमे प्रमेयो घट इत्यादौ तादृशोपस्थितिविरहदशायां घटादेः शाब्दबोधानुपपत्तिः, अतो धर्मितावच्छेदकतासम्बन्धेन घटप्रकारकशाब्दबोधे द्रव्यपदजन्यद्रव्यत्वावच्छिन्नोपस्थितेः प्रमेयपदजन्यप्रमेयत्वावच्छिन्नोपस्थितेश्च हेतुतया तद्विरहादेव घटो घट इत्यादौ घटत्वे धर्मितावच्छेदकतासम्बन्धेन शाब्दापत्तिर्न सम्भवतीति चेन्न; प्रकारतासम्बन्धेन शाब्दबोधं प्रति प्रकारतासम्बन्धेनोपस्थितेर्हेतुतायाः स्वीकरणीयत्वात् । यत्र यत्र धर्मितावच्छेदकतासम्बन्धेन शाब्दबोधस्तत्र तत्र प्रकारतासम्बन्धेन शाब्दबोध इति प्रकारतासम्बन्धेन शाब्दबोधस्य धर्मितावच्छेदकतासम्बन्धेन शाब्दबोधव्यापकतया व्यापककारणीभूतायाः प्रकारतासम्बन्धेनोपस्थितेर्द्रव्यत्वादौ धर्मितावच्छेदकतासम्बन्धेन शाब्दबोधजनकत्वस्यावश्यकत्वेन तत्र तादृशोपस्थितिविरहे शाब्दबोधासम्भवात् । घटत्वादौ च प्रकारतासम्बन्धेनोपस्थितेः सत्त्वात्तत्र धर्मितावच्छेदकतासम्बन्धेन घटप्रकारकशाब्दबोधापत्तिर्निराबाधैव ।

न च नीलो घट इत्यादौ प्रकारतासम्बन्धेन शाब्दबोधस्य नीलादावपि सत्त्वेन तत्र प्रकारतासम्बन्धेनोपस्थितेर्विरहाद् व्यभिचार इति वाच्यम्; प्रकारतासम्बन्धेन उपस्थितिविशिष्टशाब्दत्वावच्छिन्नं प्रत्येव प्रकारतासम्बन्धेनोपस्थितिः कारणम्, वे० च स्वजनकज्ञानीयवृत्तिनिष्ठप्रकारतानिरूपितविशेष्यत्वानवच्छिन्नविषयतावत्त्वसम्बन्धेनेति चेत्, घटो घट इत्यादिशाब्दबोधवारणाय घटत्वावच्छिन्नाभेदसंसर्गावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासम्बन्धेन शाब्दबोधं प्रति घटत्वभेदस्य पृथक् कारणत्वोपगमात् । तथा च घटत्वे घटत्वभेदविरहान्न

घटस्याभेदेनान्वयबोधः । द्रव्यत्वादौ घटत्वभेदसत्त्वात् तत्र घटस्याभेदान्वयबोधः सम्भवत्येव ।

वस्तुतो जातित्वेन घटत्वावगाहि 'स घटः' इत्याकारकवाक्यात् घटत्वे शाब्दबोधस्य घटाभेदप्रकारकस्योत्पत्त्या व्यभिचारः, एवं घटः स इत्यादावपि तत्पदवाच्यस्य जातित्वविशिष्टघटत्वस्य घटत्वे भेदविरहादन्वयबोधानुपपत्तिः । अतो घटत्वनिष्ठनिरवच्छिन्नावच्छेदकताकाभेदसंसर्गावच्छिन्नप्रकारतानिरूपितविशेष्यतानिरूपितनिरवच्छिन्नावच्छेदकतासम्बन्धेन शाब्दं प्रत्येव घटत्वभेदस्य हेतुतयोक्तस्थले सामान्यकारणादेव शाब्दबोधोत्पत्तिसम्भवे निरुक्तघटत्वादिभेदस्याहेतुत्वात् ।

न चैवं घटो नीलघट इत्यादौ नव्यमते शाब्दबोधो न स्यात् नीलघटत्वभेदस्य निरवच्छिन्नावच्छेदकताश्रयस्य निरवच्छिन्नविशेष्यतावच्छेदकतावति घटत्वे विरहादिति वाच्यम्, तद्रूपवृत्तिनिरवच्छिन्नावच्छेदकताकप्रकारतानिरूपितनिरवच्छिन्नविशेष्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन शाब्दबोधं प्रति तद्रूपविशिष्टभेदः कारणम्, वै० च स्वपर्याप्त्यनुयोगितानवच्छेदकव्यासज्यवृत्तिधर्मावच्छिन्नपर्याप्तिकत्वस्वतादात्म्यान्यतरसम्बन्धेन । वृत्तित्वं प्रकारतायाम्, रूपवृत्तित्वं प्रकारतायाम्, स्वावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेनेत्यस्य वक्तव्यत्वात् । तेन नीलघटो नीलघटः, नीलघटो घट इत्यादौ न शाब्दबोधः । घटो नीलघट इत्यादौ च भवत्येव शाब्दबोध इत्यस्माकं नवीनः पन्थाः सुधीभिर्विभावनीयः ।

यथाश्रुतग्रन्थानुरोधेन गौरवं प्रदर्श्य समाधानमुच्यते—तद्धर्मान्येति । तद्रूपावृत्तिविषयतासम्बन्धेन ज्ञानसामान्यं प्रति तद्रूपविशिष्टभेदः कारणम्, वै० च पूर्वोक्तान्यतरसम्बन्धेन । अवृत्तित्वघटकवृत्तित्वं च स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितापर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन । एवं सति न कोऽपि दोषः ॥

१० प्रश्न :–'राजा पुरुषः' इति वाक्यात् 'राज्ञः पुरुषः' इति वाक्यादिव कुतो नान्वयबोध इति स्पष्टीक्रियताम् ?

राजा पुरुष इत्यादौ राजपदार्थोपस्थितिपुरुषपदार्थोपस्थित्योः सत्त्वात् एवं योग्यताज्ञानादिघटितकारणसमुदायस्यापि सत्त्वात् अवश्यं स्वत्वसम्बन्धेन राजप्रकारकपुरुषविशेष्यकशाब्दबोधः स्यात्, निपातातिरिक्तेत्यादिनियमभङ्गस्तु सामग्रीसत्त्वेऽवश्यं कार्यम् इति नियमेन स्वीकरणीय एव, इति तु नाशङ्कनीयम्; स्वत्वसम्बन्धेन राजप्रकारकपुरुषविशेष्यकशाब्दबोधस्यालीकतयाऽऽपत्त्यसम्भवात् । स्वत्वसंसर्गेण राजविशिष्टपुरुषतात्पर्यकतदादिपदघटितात् स सुन्दर इति वाक्यात् तादृशशाब्दबोधस्य सम्भवेऽपि तादृशस्थले तदादिपदजन्यराजविशिष्टपुरुषाद्युपस्थितेर्हेतुतायाः आवश्यकत्वात् तादृशहेत्वभावेन न राजा पुरुष इत्यादौ राजविशिष्टपुरुषविषयकशाब्दबोधस्यापत्तिरित्यस्यैव स्वीकरणीयत्वात् ।

अत्र केचित्—

राजा पुरुष इत्यादौ स्वत्वसंसर्गेण राजप्रकारकपुरुषविशेष्यकशाब्दबोधवारणाय नामार्थनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति प्रत्ययजन्योपस्थितिर्विशेष्यतासम्बन्धेन कारणमिति कल्पनीयम् ।

न चैवं स्वत्वस्यापि नामार्थत्वेन राज्ञः पुरुष इत्यादौ स्वत्वप्रकारकपुरुषविशेष्यकशाब्दबोधो न स्यात्, पुरुषे प्रत्ययजन्योपस्थितेर्विशेष्यतासम्बन्धेन विरहादिति वाच्यम्, तत्तन्नामजन्योपस्थितिविषयत्वविशिष्टार्थनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधं प्रति तादृशोपस्थितेर्हेतुत्वकल्पनेनोक्तानुपपत्तिवारणसम्भवात् । 'राज्ञः पुरुष.' इत्यादौ स्वत्वादेः षष्ठ्यर्थतया तत्तन्नामजन्योपस्थितिविषयत्वविशिष्टनामार्थत्वस्य तत्र विरहात् । यद्यपि राज्ञः पुरुषः, राजसम्बन्धः प्रमेय इत्याकारकवाक्यद्वयजन्यराजस्वत्ववान् पुरुषः राजसम्बन्ध्यभिन्नं प्रमेयम् इत्याकारकसमूहालम्बनशाब्दबोधः पुरुषविशेष्यकराजस्वत्वप्रकारको न स्यात्,

राजस्वत्वसम्बन्धस्य यथोक्तसम्बन्धरूपनामार्थतया तत्प्रकारकान्वय-बोधकारणीभूतप्रत्ययजन्योपस्थितेर्विशेष्यतासम्बन्धेन पुरुषेऽसत्त्वात्, तथापि प्रत्ययाधीनतत्तदुपस्थित्यजन्यतत्तन्नामार्थनिष्ठप्रकारताकशाब्द-त्वावच्छिन्नं प्रति समानविशेष्यताप्रत्यासत्त्या प्रत्ययजन्योपस्थितेः कारणत्वकल्पनेन सामञ्जस्यात्, उक्तशाब्दबोधस्य प्रत्ययाधीनोपस्थिति-जन्यतया तत्रोक्तकार्यकारणभावासत्त्वेऽपि क्षत्यभावात् ।

न च सुपदजन्यैकत्वविषयकपुरुषविषयकसमूहालम्बनोपस्थितिर्यत्र, तत्र पुरुषेऽपि प्रत्ययाधीनोपस्थितेर्विशेष्यतासम्बन्धेन सत्त्वात् राजा पुरुष इत्यादौ पुरुषेऽपि स्वत्वसंसर्गेण राजप्रकारकशाब्दबोधः स्यात्, प्रत्यय-जन्यतावच्छेदकाविशेष्यतासम्बन्धेन प्रत्ययजन्योपस्थितर्हेतुत्वकल्पने पुरुषनिष्ठविशेष्यतायाः प्रत्ययजन्यतानवच्छेदकत्वेनोक्तापत्तिवारणसंभवेऽ-पि ज्ञानभेदेन विषयताभेदानभ्युपगन्तृमते यादृशस्थले कस्यचित् प्रत्ययस्य पुरुषादौ लक्षणा तादृशपुरुषनिष्ठप्रत्ययजन्यतावच्छेदकविशेष्यतातो राजा पुरुष इत्यादौ पुरुषपदजन्यपुरुषनिष्ठविशेष्यताया भेदविरहात्तस्या अपि प्रत्ययजन्यतावच्छेदकतया तादृशविशेष्यतासम्बन्धेन पुरुषोपस्थितेः पुरुषे सत्त्वात् तत्र स्वत्वसंसर्गेण राजप्रकारकान्वयबोधापत्तिरिति वाच्यम्; स्वजनकज्ञानीयप्रत्ययजन्यबोधविषयत्वप्रकारतानिरूपितभगव-दिच्छीयनिशेष्यताविशिष्टविशेष्यतासम्बन्धेनोपस्थितेर्हेतुत्वकल्पनेन सर्वा-सामनुपपत्तीनामुद्धारसम्भवात् विशेष्यतावैशिष्ट्यं सामानाधिकरण्य-सम्बन्धेन । स्वमुपस्थितिः । तथा चोक्तस्थले प्रत्ययजन्यबोधविषयत्व-प्रकारतानिरूपितभगवदिच्छीयविशेष्यतानिष्ठप्रकारतानिरूपितविशेष्य-तासामानाधिकरण्यस्य पुरुषे विरहान्न पुरुषे स्वत्वसंसर्गेण राजप्रकार-कशाब्दबोधस्य विशेष्यतासम्बन्धेनापत्तिरित्याहुः, तन्न; प्रत्ययत्वस्यानुगत-स्याख्यातकृत्तद्धितादिसाधारणस्य वक्तुमशक्यत्वात् । एवं राजसम्बन्धः पुरुष इत्यादौ सम्बन्धपदस्य ङस्पदत्वेन यदा भ्रमज्ञानं तदा राजपदा-र्थस्य सम्बन्धादावन्वयबोधस्यावश्यकतया तस्यानुपपत्तिः; प्रत्ययजन्यो-पस्थितेः सम्बन्धे सत्त्वात् । यदा राज्ञः पुरुष इत्यादौ ङस्पदस्य सम्बन्ध-पदत्वेन रूपेण भ्रमः, तदा राजपदार्थस्य सम्बन्धादावन्वयाबोधात् तादृश-

बोधापत्तिः; प्रत्ययजन्योपस्थितेर्विशेष्यतासम्बन्धेन सम्बन्धपदार्थेऽसत्त्वात्। प्रत्ययत्वेन ज्ञातपदजन्योपस्थितेर्हेतुत्वस्वीकारे तु नोक्तस्थले दोषः; प्रथमे सम्बन्धपदस्य प्रत्ययत्वेन ज्ञाततयाऽन्वयबोधोपपत्तिः। द्वितीये तु सम्बन्धत्वेनैव ज्ञाततया न शाब्दबोधापत्तिरित्यपि न शङ्कनीयम्; राज्ञः पुरुष इत्यादौ ङस्पदस्य प्रत्ययत्वेन ज्ञानं नास्ति तदा राजप्रकारकान्वयबोधानुपपत्तेर्वज्रलेपत्वात् ॥

११ प्रश्नः—'राज्ञः पुरुषः' इति वाक्यजे बोधे स्वत्वस्य संसर्गतया प्रकारतया वा भानमिति सुस्पष्टं निरूप्यताम् ?

ननु राज्ञः पुरुष इत्यादौ विभक्तिः साधुत्वार्थिकैव स्वीक्रियतां स्वत्वसम्बन्धेन राजादेरेव पुरुषादावन्वयाभ्युपगमात्, तादृशान्वयाभ्युपगमे राजा पुरुष इत्यादौ न स्वत्वसंसर्गेण राजपुरुषयोरन्वयबोधः सम्भवति, तत्स्थले षष्ठ्यन्तराजपदत्वावच्छिन्नधर्मिकपुरुषपदसमभिव्याहारज्ञानस्य हेतुत्वात् तादृशकारणस्य राजा पुरुष इत्यादावसत्त्वात् इति निपातातिरिक्तनामार्थस्यापि भेदसम्बन्धेनान्वयबोधात् तादृशनियमोऽकिंचित्कर इति चेत्, न; 'राज्ञः पुरुषः' इत्यादौ स्वत्वसंसर्गेण राज्ञः पुरुषादावन्वयस्वीकारे वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितानवच्छेदकतया पुरुषो न राज्ञ इत्यादावन्वयबोधानुपपत्तेः, स्वत्वसंसर्गावच्छिन्नराजाद्यभावस्याप्रसिद्धत्वात्। अत एव नवीनाः 'स्वामित्वं न षष्ठ्यर्थः, अपि तु स्वत्वमेव षष्ठ्यर्थः' इति स्वीकुर्वन्ति। अन्यथा स्वामित्वस्य षष्ठ्यर्थत्वे तस्य निरूपकतासम्बन्धेनैव पुरुषादावन्वयस्यावश्यकतया पुरुषो न राज्ञ इत्यादावन्वयबोधानुपपत्तिः, निरूपकताया वृत्त्यनियामकतया तत्सम्बन्धत्वावच्छिन्नप्रतियोगिताकस्वामित्वाभावस्याप्रसिद्धत्वात्।

न च स्वरूपसम्बन्धेनैव स्वामित्वाभावः पुरुषादौ वाच्य इति वाच्यम्; तथा सति चैत्रस्वामिकेऽपि धने नेदं चैत्रस्येति प्रयोगापत्तेः, स्वरूपसम्बन्धेन चैत्रनिष्ठस्वामित्वस्य धनादावभावसत्त्वात्।

यदि च राज्ञो न पुरुष इत्यादौ 'प्रतियोग्यभावान्वयौ च तुल्ययोगक्षेमौ' इति नियममनभ्युपगम्य राजस्वत्वस्य षष्ठ्यर्थत्वं स्वीकृत्य च

तादृशस्वत्वस्यैवाभावबोधः पुरुषादावङ्गीक्रियते, तदा 'राज्ञः पुरुषः' इत्यादिवाक्यजन्यस्वत्वसम्बन्धेन राजप्रकारकपुरुषविशेष्यकान्वयबोधोत्तरक्षणे 'पुरुषो न राज्ञः' इत्यादिवाक्याद् राजस्वत्वाभावप्रकारकपुरुषविशेष्यकशाब्दबोधापत्तेः। स्वत्वाभावप्रकारकबुद्धौ स्वत्वप्रकारकनिश्चयस्यैव प्रतिबन्धकतया स्वत्वसंसर्गेण राजप्रकारकतथाविधनिश्चयस्य निरुक्ताभावबुद्धावप्रतिबन्धकत्वात्।

यदि च मणिमन्त्रादिन्यायेन राजस्वत्वाभावबुद्धावपि स्वत्वसंसर्गेण राजप्रकारकनिश्चयस्य प्रतिबन्धकत्वं स्वीक्रियते, तदा वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितावच्छेदकत्वेऽपि च न निस्तारः; 'राज्ञः पुरुषः' इत्यादिवाक्यघटितस्वत्वसंसर्गेण राजप्रकारकपुरुषविशेष्यकान्वयबोधसामग्रीदशायां 'राजस्वत्वाभाववान् पुरुषः सुन्दरः' इत्याकारकराजस्वत्वविशिष्टाभावविशिष्टपुरुषविषयकप्रत्यक्षादेर्वारणाय तादृशसामग्र्याः प्रतिबन्धकत्वमेकमधिकं कल्पनीयम्। राजस्वत्वप्रकारकान्वयबोधवादिमते तु न तादृशविशिष्टवैशिष्ट्यप्रत्यक्षादौ राज्ञः पुरुषादिरूपवाक्यघटितसामग्र्याः प्रतिबन्धकत्वं कल्पनीयम्। निरुक्तप्रत्यक्षादौ विशेषणतावच्छेदकप्रकारकनिश्चयस्य राजस्वत्वाभाववान् पुरुष इत्याकारकहेतुतया तत्सत्त्वमेव न सम्भवति, स्वत्वस्य प्रकारतावादिमते राजस्वत्वाभाववान् पुरुष इत्याकारकनिश्चयाभावस्य निरुक्तशाब्दबोधे हेतुत्वात् तादृशशाब्दबोधसामग्रीकाले तादृशविशिष्टवैशिष्ट्यप्रत्यक्षादेः कारणाभावेन तादृशप्रत्यक्षापत्तेरसम्भवात्। न वा भिन्नविषयकप्रत्यक्षादौ तद्विषयकशाब्दसामग्र्याः क्लृप्तत्वेऽपि भवन्मते निस्तारः; घटादिप्रत्यक्षं प्रति घटप्रत्यक्षेच्छाविरहविशिष्टस्वत्वसंसर्गकराजप्रकारकपुरुषविशेष्यकान्वयबोधसामग्र्याः प्रतिबन्धकताया अवश्यं वाच्यतया 'राजस्वत्वाभाववान् पुरुषः सुन्दर इत्याकारकविशिष्टवैशिष्ट्यबोधो जायताम्' इत्याकारकेच्छोत्तरं तादृशबोधो न स्यात्; घटप्रत्यक्षेच्छाविरहविशिष्टाया राजप्रकारकस्वत्वसंसर्गकशाब्दबोधसामग्र्याः सत्त्वात्। विशिष्टवैशिष्ट्यबोधेच्छाविरहविशिष्टतादृशसामग्र्याः प्रतिबन्धकत्वकल्पने तु

घटप्रत्यक्षेच्छादशायां तादृशशाब्दसामग्रीसत्त्वे घटप्रत्यक्षं न स्यात्; तादृशबोधेच्छाविरहविशिष्टायास्तादृशशाब्दसामग्र्याः सत्त्वात्।

न च तदन्यविषयकेच्छाविरहविशिष्टायास्तद्विषयकशाब्दसामग्र्यास्तदन्यविषयकप्रत्यक्षादौ प्रतिबन्धकत्वकल्पनेनैव न कोऽपि दोष इति वाच्यम्; तथा सति घटप्रत्यक्षेच्छादशायां स्वत्वसंसर्गकराजप्रकारकान्वयबोधसामग्रीसत्त्वे पटप्रत्यक्षापत्तेः। तदन्यविषयकेच्छाविरहविशिष्टायास्तादृशशाब्दसामग्र्या यथोक्तप्रतिबन्धकीभूताया असत्त्वात् इत्यकामेन भवन्मते राजस्वत्वाभाववत्पुरुषविषयकबुद्धित्वावच्छिन्नं प्रति तादृशेच्छाविरहविशिष्टशाब्दसामग्र्याः प्रतिबन्धकताया अवश्यं कल्पनीयतापत्तेः।

यद्यपि स्वत्वसंसर्गेण 'राजाभाववान् पुरुषः सुन्दरः' इत्याकारकबोधे प्रकारतावादिमतेऽपि स्वत्वप्रकारकशाब्दबोधसामग्र्या अतिरिक्तप्रतिबन्धकताया: कल्पनीयतापत्तिः स्यात्, तथापि निरूपितत्वसम्बन्धेन राजाभाववत्स्वत्वाभाववान् पुरुष इत्याकारकबोधं प्रति स्वत्वसंसर्गकराजप्रकारकशाब्दबोधसामग्र्याः प्रतिबन्धकताया आवश्यकत्वेन संसर्गतावादिनां मत एव गौरवस्यावर्जनीयता स्यात्। प्रकारतावादिनां मते एवं यावत् पूर्वपक्षेषु लाघवमिति भट्टाचार्याशयोऽवगन्तव्यः॥

१२ प्रश्नः—'राजपुरुषः' इति वाक्यजे शाब्दबोधे स्वत्वस्य संसर्गतया भानस्वीकारे लाघवेन तत्र राजपदस्य राजसम्बन्धिनि लक्षणाभ्युपगमस्य औचित्यं कथं समर्थनीयम् ?

ननु 'राजपुरुषः' इत्यादौ स्वत्वसंसर्गेणैव राजादेः पुरुषादावन्वयोऽस्तु, तादृशान्वयाभ्युपगमे 'राजा पुरुषः' इत्यादौ न स्वत्वसंसर्गेण राजपुरुषयोरन्वयबोधः सम्भवति, तत्स्थले राजपदाव्यवहितोत्तरपुरुषपदत्वज्ञानस्य हेतुत्वात् तादृशकारणस्य 'राजा पुरुषः' इत्यादावसत्त्वादिति

निपातातिरिक्तनामार्थस्यापि भेदसम्बन्धेनान्वयबोधात् तादृशनियमोऽकिंचित्करः।

न च नृपपुरुष इत्यादिवाक्यादपि भवन्मते राजप्रकारकपुरुषविशेष्यकशाब्दबोधजननाद् राजपदाव्यवहितोत्तरपुरुषपदप्रकारकज्ञानस्य तादृशस्थलेऽसत्त्वाद् व्यभिचार इति वाच्यम्; राजपदाव्यवहितोत्तरपुरुषपदत्वप्रकारकज्ञानाव्यवहितोत्तरजायमानशाब्दत्वावच्छिन्नं प्रत्येव तादृशज्ञानस्य हेतुत्वाभ्युपगमेन व्यभिचारवारणसम्भवात्। एतेन तादृशस्थले राजपदस्य राजसम्बन्धिनि लक्षणा, तत्र राजसम्बन्ध्यभिन्नपुरुषविषयकशाब्दबोधस्य राजपुरुष इत्यादिवाक्याज्जायमानस्य सर्वसम्मततया स्वत्वसंसर्गेण शाब्दबोधमङ्गीकुर्वाणां मते राजपदाव्यवहितोत्तरपुरुषपदत्वप्रकारकज्ञानस्य द्विविधबोधे हेतुतायाः स्वीकरणीयतया गौरवमित्यपास्तम्, तादृशज्ञानाव्यवहितोत्तरत्वेन द्विविधशाब्दबोधस्यापि त्वन्मते धर्तुं शक्यत्वात् इति चेत्, न; राजपुरुष इत्यादिसमासवाक्यात् स्वत्वसंसर्गकशाब्दबोधस्वीकारे तादृशशाब्दबोधसामग्र्याः स्वत्वसंसर्गेण राजविशिष्टपुरुषतात्पर्यज्ञानादिघटिताया भिन्नविषयकप्रत्यक्षादिकं प्रति प्रतिबन्धकत्वाधिक्येन गौरवात्। तत्र राजसम्बन्धिप्रकारकाभेदान्वयबोधस्वीकार एवोचितः।

न च भवन्मतेऽपि तादृशाभेदान्वयबोधसामग्र्याः प्रतिबन्धकताधिक्येन गौरवमिति वाच्यम्; राजसम्बन्धिनि स्वारसिकलक्षणाग्रहदशायामभेदसम्बन्धेन राजसम्बन्धिविशिष्टपुरुषे तात्पर्यग्रहसत्त्वे भवन्मतेऽपि कर्मधारयत्वेनाभिमतात् तथाविधसमासवाक्यात् तादृशशाब्दबोधस्वीकारस्यावश्यकतया तादृशसामग्रीप्रतिबन्धकताया उभयमतसिद्धत्वात्॥

१३ प्रश्नः—मतान्तरं निरस्य संख्याया विभक्त्यर्थत्वं युक्त्योपपाद्य सिद्धान्तपक्षः स्फुटीकर्तव्यः॥

यत्तु संख्या प्रकृतेरर्थः, एकवचनादि तात्पर्यग्राहकम्, आकाङ्क्षावैचित्र्याच्च एकप्रकृत्युपस्थाप्ययोरपि घटैकत्वयोः परस्परमन्वयः।

कर्मत्वादिकं तु न ण्यकृप्रथः, नामार्थधात्वर्थयोः साक्षाद् भेदान्वयबोधस्याव्युत्पन्नत्वात् ।

न चैवं द्विवचनाद्यन्तपदादेकत्वादिबोधापत्तिः, अनादितात्पर्यस्य स्वारसिकप्रयोगमूलत्वेनैकवचनान्तपदस्यैव एकत्वादावनादितात्पर्योपगमेनातिप्रसंगाभावात् । 'द्व्येकयोः' इत्यनुशासनमप्युक्तार्थं एव तात्पर्यग्राहकमिति शाब्दिकमतम्, तन्न युक्तम्; अनन्तानां प्रकृत्यानुपूर्वीणां वाचकतावच्छेदकत्वकल्पनापेक्षयाऽल्पतरविभक्त्याद्यानुपूर्वीणामेवैकत्वादिशक्तावच्छेदकत्वौचित्यात् । प्रातिपदिकत्वपदत्वाद्यानुपूर्वीभिन्नधर्मस्य वाचकतावच्छेदकत्वे घटपदं सुपदं च न संख्यावाचकमिति निश्चयकालेऽपि संख्याया बोधापत्तिः ।

न च विभक्तीनां संख्यावाचकत्वे प्रकृतिविभक्त्योरेकवाक्यताविरहनिश्चयदशायामपि संख्यान्वयबोधवारणाय प्रकृतिविभक्त्योः समभिव्याहारज्ञानस्य कारणत्वमधिकं कल्पनीयमिति वाच्यम्, समभिव्याहाररूपाकाङ्क्षाज्ञानस्य हेतुताया निराकृतत्वात् ।

अथ संख्याविशिष्टस्वार्थे प्रकृतीनां लक्षणाऽस्तु, प्रथमाविभक्तेश्च शक्तेरवलुप्ततया न सा सम्भवति, द्वितीयादेः कर्मत्वादौ शक्तत्वेऽपि तत्र प्रकृतेर्विभक्तेर्वा संख्यायां लक्षणेत्यत्र विनिगमकवैकल्यम् ।

न च संख्यान्वयबोधे घटाद्यनन्तपदज्ञानजन्योपस्थितित्वेन हेतुत्वकल्पनापेक्षयाऽल्पतरस्वादिपदज्ञानजन्यतदुपस्थितित्वेन हेतुत्वकल्पनं वरम्; सामान्यतः पदवृत्तिज्ञानजन्यतदुपस्थितित्वेनैककारणत्वं तु न युक्तम्, निर्विभक्तिककुम्भपदात् संख्योपस्थितौ तदगृहीतवृत्तिकघटादिपदे सुबन्तत्वज्ञानवतः पुंसो घटादौ संख्यान्वयबोधप्रसङ्गादिति वाच्यम्; घटादिपदस्यैकत्वादौ लक्षणाग्रहसत्त्वे एकत्वान्वयबोधस्य सर्वसम्मततया तदनुरोधेनैकत्वादिविषयकशाब्दबोधे घटादिपदजन्यैकत्वाद्युपस्थितित्वेन हेतुतायाः सर्ववादिसिद्धत्वात् । मैवम्; यादृशयादृशपदानां लक्षणयैकत्वादिविषयकशाब्दबोधजनकत्वं नोभयवादिसिद्धम्, तादृशानन्त-

पदज्ञानजन्यैकत्वाद्युपस्थितीनामेकत्वादिविषयकशाब्दधीजनकत्वकल्पने प्रकृतेः संख्यावाचकतावादिनां मते गौरवम्, तस्मात् तदपेक्षयाऽल्पतरस्वादिप्रत्ययानामेव संख्यावाचकत्वं कल्पनीयमिति सिद्धम् ।

वस्तुतस्तु सुपां संख्यावाचकत्वे योग्यताज्ञानघटोपस्थित्येकत्वोपस्थितीनां विशेष्यविशेषणभावे विनिगमनाविरहेण विभिन्नविषयकप्रत्यक्षं प्रति प्रतिबध्यप्रतिबन्धकभावषट्कम्, प्रकृतेः संख्यावाचकत्वमते तच्चतुष्टयमात्रम् इति रीत्या महल्लाघवम् । विशेष्यविशेषणभावे विनिगमनाविरहो यथा—१. योग्यताज्ञानविशिष्टघटोपस्थितिविशिष्टैकत्वोपस्थितिः, २. एकत्वोपस्थितिविशिष्टघटोपस्थितिविशिष्टयोग्यताज्ञानम्, ३. घटोपस्थितिविशिष्टैकत्वोपस्थितिविशिष्टयोग्यताज्ञानम्, ४. घटोपस्थितिविशिष्टयोग्यताज्ञानविशिष्टैकत्वोपस्थितिः, ५. एकत्वोपस्थितिविशिष्टयोग्यताज्ञानविशिष्टघटोपस्थितिः, ६. योग्यताज्ञानविशिष्टैकत्वोपस्थितिविशिष्टघटोपस्थितिश्च ।

संख्यायाः प्रकृत्यर्थत्वपक्षे तच्चतुष्टयमात्रम्, यथा—१. घटनिष्ठविशेष्यतानिरूपितसंख्याप्रकारकोपस्थितिविशिष्टयोग्यताज्ञानम्, २. संख्यानिष्ठप्रकारतानिरूपितघटनिष्ठविशेष्यताकोपस्थितिविशिष्टयोग्यताज्ञानम्, ३. योग्यताज्ञानविशिष्टघटनिष्ठविशेष्यतानिरूपितसंख्यानिष्ठप्रकारताकोपस्थितिः, ४. योग्यताज्ञानविशिष्टसंख्यानिष्ठप्रकारतानिरूपितघटनिष्ठविशेष्यताकोपस्थितिश्चेति ॥

१४ प्रश्नः—द्वित्वस्य प्रत्येकसाधारण्यस्य दुर्वारतवा घटाकाशगतद्वित्वस्य आकाशे सत्त्वेन 'आकाशौ' इति प्रयोगस्य कुतो न प्रामाण्यम् ?

विभक्त्यर्थद्वित्वादिकं पर्याप्तिसम्बन्धेनैव प्रकृत्यर्थेऽन्वेति ।

न चैकत्वपर्याप्तिसम्बन्धेनासतो द्वित्वादेरुभयत्र सत्त्वस्याप्रसिद्धतया घटाकाशगतद्वित्वस्यापि पर्याप्तिसम्बन्धेनाकाशे सत्त्वात् तादृशद्वित्वमादाय 'आकाशौ' इति प्रयोगापत्तिरिति वाच्यम्, उद्देश्यतावच्छेदक-

व्याप्तिविशिष्टपर्याप्तिसम्बन्धस्यैव द्वित्वान्वयितावच्छेदकसम्बन्धत्वोपगमात्। तथा चाकाशत्वव्याप्तिविशिष्टद्वित्वपर्याप्तेरप्रसिद्धत्वात् न आकाशाविति तथार्थप्रत्ययः। आकाशाविति भ्रमात्मकप्रत्ययस्तु भवत्येव। तेन व्याप्तिविशिष्टसम्बन्धस्य ज्ञानीयव्याप्तिविषयतानिरूपितविषयताश्रयीभूतसम्बन्धेनान्वयबोधस्य स्वीकरणीयतया उद्देश्यतावच्छेदक-(आकाशत्व)व्याप्तेर्द्वित्वपर्याप्तिसम्बन्धांशे भ्रमत्वोपगमेन तादृशाकाशाविति भ्रमात्मकशाब्दबोधजनकवाक्यप्रयोगोपपत्तेः।

न च व्यापकतासम्बन्धेन घटावित्यत्र द्वित्वसंख्याया घटत्व एवान्वय इति वाच्यम्, निरवच्छिन्नविशेष्यताकशाब्दबोधानभ्युपगमात्। घटावित्यत्र स्वरूपत एव घटत्वस्योपस्थिततया तत्र पदार्थान्तरान्वयासम्भवात्। अन्यथा घटत्वं द्वित्वाभाववदित्याकारकनिश्चयदशायामपि घटावित्यादिवाक्याद् घटत्वनिष्ठनिरवच्छिन्नविशेष्यताकद्वित्वप्रकारकान्वयबोधापत्तिः स्यात्।

न च तथापि स्वव्यापकोद्देश्यतावच्छेदकवत्त्वसम्बन्धेन 'घटौ' इत्यत्र घट एव द्वित्वसंख्याया अन्वयः सम्भवतीति वाच्यम्; निरुक्तसम्बन्धापेक्षयोद्देश्यतावच्छेदकव्याप्तिविशिष्टपर्याप्तिसम्बन्धस्य गुरुत्वासम्भवेन तस्यैव द्वित्वादिसंख्यासम्बन्धताभ्युपगमे क्षत्यभावात्।

यद्यपि प्रमेयौ इत्यत्र प्रमेयत्वाभावाप्रसिद्धया स्वव्यापकोद्देश्यतावच्छेदकसामानाधिकरण्यमेवोद्देश्यतावच्छेदकनिरूपिता व्याप्तिर्वाच्या, एवं च स्वव्यापकोद्देश्यतावच्छेदकवत्त्वसम्बन्धेनैव लाघवात् प्रकृतार्थे द्वित्वादिसंख्यान्वयः स्वीकर्तव्य इत्युच्यते, तदापि न निस्तारः, 'आकाशं न द्वित्ववत्' इत्याकारकनिश्चयकालेऽपि 'आकाशौ' इत्यादिवाक्यात् भ्रमात्मकद्वित्वप्रकारकाकाशविशेष्यकबोधापत्तेः। 'आकाशं न द्वित्ववत्' इत्यत्र द्वित्ववत्त्वं पर्याप्तिसम्बन्धेनैव वाच्यम्, न त्वाकाशत्वव्याप्तिविशिष्टपर्याप्तिसम्बन्धेन द्वित्ववत्त्वम्; तेन सम्बन्धेन द्वित्ववत एवाप्रसिद्धत्वात्। तथा च शुद्धपर्याप्तिसम्बन्धावच्छिन्नद्वित्वनिष्ठावच्छेदक-

ताकप्रतियोगिताकभेदप्रकारकाकाशविशेष्यकनिश्चयस्य तेनैव सम्बन्धेन द्वित्वप्रकारकाकाशविशेष्यकबुद्धिप्रतिबन्धकतया स्वव्यापकाकाशत्व-वत्त्वसम्बन्धेन द्वित्वप्रकारकाकाशविशेष्यकबुद्धिं प्रति निरुक्तनिश्चयस्या-प्रतिबन्धकत्वात्। निरुक्तपर्याप्तिसम्बन्धेन द्वित्ववद्भेदनिश्चयकाले स्व-व्यापकोद्देश्यतावच्छेदकवत्त्वसम्बन्धेन द्वित्वप्रकारकाकाशाविति वाक्य-जन्यबोधस्यापत्तेः कथामात्रेण वारयितुमशक्यत्वात्॥

१५ प्रश्नः—पर्याप्तिसाधिकां युक्तिं लिखित्वा एकैकधवखदिरतात्पर्य-ग्राहकस्य 'धवखदिरौ' इति प्रयोगस्य प्रामाण्यमुपपाद्यताम्?

अथ केयं पर्याप्तिः? घटावित्यत्र घटत्वव्याप्तिविशिष्टसमवायसम्बन्धेन घटादौ द्वित्वान्वयसंभवात् पर्याप्त्याख्यविलक्षणसम्बन्धानभ्युपगमेऽपि क्षत्यभावादिति चेन्न; समवायस्यैकत्वात् घटत्वव्याप्तिविशिष्टत्वेन समवा-यस्य भेदविरहात्। समवायमात्रस्यैव घटत्वव्याप्तिविशिष्टत्वात्। तथा च पर्याप्तिस्वीकारे आकाशाविति वाक्यस्य प्रामाण्यापत्तिः; आकाशत्व-व्याप्यसमवायसम्बन्धेन घटाकाशगतद्वित्वस्याकाशे सत्त्वात्। समवायस्य नानात्वे त्विष्टापत्तिरेव; समवायाभ्युपगमेऽपि क्षत्यभावात्। दीधितिका-रोक्त-'अयमेको द्वौ' इत्याकारकप्रतीतिसाक्षिकद्वित्वादेरेव पर्याप्तिरूपस्व-रूपसम्बन्धत्वाभ्युपगमात्। द्वित्वं तूभयत्वावच्छेदेन प्रत्येकं वर्तते। प्रत्येकवृत्तिधर्मावच्छेदेन तु प्रत्येकं वर्तते। अत एव 'अयं द्वौ' इत्याका-रकप्रतीतिभ्रमरूपैव; इदन्त्वावच्छिन्नपर्याप्तिसम्बन्धेन द्वित्वविरहिणि द्वित्वप्रकारकत्वादुक्तप्रतीतेः।

ननु 'धवखदिरौ छिन्धि' इत्यत्रोद्देश्यतावच्छेदकव्याप्तिविशिष्टपर्याप्ति-सम्बन्धेन धवद्वयगतखदिरद्वित्वमेव प्रत्याय्यते एकधवैकखदिरतात्पर्येण तथा प्रयोगानुपपत्तिरिति चेन्न; उद्देश्यतावच्छेकं यत्र द्वयं तत्र शुद्धपर्या-प्तेरेव संसर्गत्वात्। यत्र त्वेकं तत्रैवोद्देश्यतावच्छेदकव्याप्तिविशिष्टपर्या-प्तिसम्बन्धत्वाभ्युपगमात्।

'धवखदिरौ छिन्धि' इत्यत्र धवत्वावच्छिन्नखदिरत्वावच्छिन्नविशेष्यताया विभिन्नत्वेऽपि उक्तविशेष्यताद्वयनिरूपितमेकमेव विशेष्यत्वम्, समूहालम्बनविलक्षणज्ञानीयमभ्युपगन्तव्यम्। अत एवैकवाक्यत्वमेव समासत्वम्। यत्र त्वेकवाक्यतावि रहस्तत्र समासत्वमेव न वर्तते। एकवाक्यत्वं च तत्पदप्रयोज्यविषयताया साक्षात् परम्परया वा निरूपिता विषयता तत्प्रयोजकत्वम्, यथा धवपदप्रयोज्यविषयता या परम्परया खदिरपदप्रयोज्यविषयता निरूपिता, धवविषयतानिरूपितद्वित्वप्रकारता-निरूपितखदिरविषयताप्रयोजकत्वस्य खदिरपदे सत्त्वात् धवखदिरपदयोरेकवाक्यत्वम्। घटावित्यस्यैकवाक्यत्वसम्पत्तये साक्षादिति। घटपदोपदयोरेकवाक्यत्वं निराबाधम्; घटविषयतानिरूपितसाक्षाद्द्वित्वविषयताप्रयोजकत्वस्य औपदे सत्त्वात्।

१६ प्रश्नः—एकघटेऽपि द्वित्वस्य दुर्निवारतयाऽत्र गेहे एकघटसत्त्वदशायाम् 'अत्र गेहे घटौ स्तः' इति प्रयोगस्य प्रामाण्यापत्तिः परिहियताम् ?

अथैकस्मिन् गृहे एकघटसत्त्वदशायाम् 'अत्र घटौ स्तः' इति प्रयोगापत्तिः; घटे पर्याप्तिसम्बन्धेनैतद्देशवृत्तित्वस्यापि सत्त्वात्।

न चैतद्देशवृत्तित्वरूपविधेयप्रतियोगिकस्वरूपसम्बन्धे उद्देश्यतावच्छेदकद्वित्वव्यापकत्वाभ्युपगमान्नोक्तप्रयोगापत्तिः, द्वित्ववति घटान्तरे एतद्देशवृत्तित्वसम्बन्धस्यासत्त्वादिति वाच्यम्, सामान्यतो द्वित्ववन्निष्ठात्यन्ताभावप्रतियोगितानवच्छदकधर्मवत्त्वस्यैतद्देशवृत्तित्वसम्बन्धेऽसत्त्वात् द्वित्ववत्त्वस्यैतद्देशावृत्तिपटेऽपि सत्त्वाद् घटगततत्तद्द्वित्ववन्निष्ठभेदप्रतियोगितानच्छेदकधर्मवत्त्वस्य तत्र विधेयसंसर्गे सत्त्वेऽपि घटपदोत्तरविभक्त्या तत्तद्द्वित्वत्वेन रूपेणानुपस्थित्या तेन रूपेण व्यापकतया संसर्गज्ञानासम्भवात् 'अत्र घटौ स्तः' इत्यादिवाक्यं तद्द्वित्वव्यापकैतद्देशवृत्तित्वस्वरूपसम्बन्धावच्छिन्नतादृशवृत्तित्वप्रकारताकबोधेच्छया उच्चरितम्, इत्यादितात्पर्यज्ञाने तत्तद्द्वित्वस्य प्रकारतयोपस्थित्या तज्ज्ञानस्य शाब्द-

बोधात् पूर्वमावश्यकत्वात् इति चेत्? अत्राहुः—स्वव्याप्योद्देश्यतावच्छेदकवत्त्वसम्बन्धेन निरुक्तस्थले विधेयीभूतैतद्देशवृत्तित्वस्य सम्बन्धत्वेनाभ्युपगमान्न दोषः। सम्बन्धघटकोद्देश्यतावच्छेदकवत्त्वं चोद्देश्यतावच्छेदकीभूतसम्बन्धेनैतद्देशे एकघटमात्रसत्त्वदशायां न घटौ स्त इति प्रयोगः, एतद्देशवृत्तित्वव्याप्यं यद् घटपटद्वयगतं द्वित्वं तस्योद्देश्यतावच्छेदकताघटकीभूतोद्देश्यतावच्छेदकव्याप्तिविशिष्टपर्याप्तिसंबन्धेन एकघटे विरहात् इति सम्बन्धस्यैकघटेऽसत्त्वात् सम्बन्धिनोऽप्येतद्देशवृत्तित्वस्य तत्र सत्त्वेन तादृशापत्तेरयोगात्। एवमेकघटानयनदशायां 'घटावानयति चैत्रः' इति न प्रयोगः; चैत्रकर्तृकानयनकर्मताव्याप्यप्रकारतावच्छेदकद्वित्ववत्ताया घटत्वव्याप्तिविशिष्टपर्याप्तिसम्बन्धेन घटद्वय एव सत्त्वात् एकघटे एतादृशद्वित्ववत्त्वस्य विरहात्॥

१७ प्रश्नः—मणिकृद्दीधितिकृतोर्मतभेदप्रदर्शनपुरःसरं 'चैत्रो जानाति' इत्यत्र आश्रयतायाः संसर्गता प्रकारता वेति विशदं विविच्यताम्?

मणिकृतां मते ज्ञाधातूत्तराख्यातो निरर्थकः, आश्रयतायास्तत्र संसर्गतयैव शाब्दे भानम्, आख्यातान्तज्ञासमभिव्याहारज्ञानस्य तादृशबोधहेतोरभावेन न 'ज्ञानं चैत्रः' इत्यतस्तादृशबोधापत्तिः, उक्तसमभिव्याहारज्ञानस्य हेतुता च प्रकारतावादिभिरपि 'ज्ञानम्' 'आश्रयत्वम्' 'चैत्रः' इत्यतस्तन्मतसिद्धबोधवारणाय नूनमङ्गीकार्येति न तत्कल्पनाप्रयुक्तगौरवभीतिः।

आश्रयतासम्बन्धेन ज्ञानविशिष्टचैत्रतात्पर्यकात् सर्वनाम्नः आश्रयतासंसर्गकशाब्दस्य प्रकारतावादिभिरप्युपेयतयाऽऽश्रयतासंसर्गकयोग्यताज्ञानस्य नातिरिक्तहेतुताकल्पनप्रयुक्तं गौरवम्।

न च पदार्थान्तरामिश्रितस्य तस्य हेतुताकल्पनं नवीनमेवेति वाच्यम्; प्रकारतामतेऽवश्यं कल्पनीयाया आश्रयताप्रकारकयोग्यताज्ञानस्यातिरिक्तहेतुतायां गुरुतरायां अपेक्षया आश्रयतासंसर्गकयोग्यत्ताज्ञानहेतुतायां तत्संसर्गविषयत्वादीनामप्रवेशेन लाघवात्, शक्तिभ्रमादिनाऽऽश्रयत्वोप-

स्थितिदशायामपि संसर्गतामते आश्रयतासंसर्गकशाब्दस्यैवाङ्गीकारेण तत्प्रकारकयोग्यताज्ञानस्य तन्मतेऽकारणतया तत्कारणताया अपि कल्पनामूलकस्य गौरवस्य शंकितुमशक्यत्वात्।

दीधितिकृन्मते तु न तस्य नैरर्थक्यम्; शक्तिभ्रमादिना ज्ञानाश्रयत्वोपस्थितिदशायामाश्रयताप्रकारकबोधस्यैव संसर्गतामतेऽपि मन्तव्यतया तदुपपत्तये आश्रयताप्रकारकयोग्यताज्ञानस्य कारणतायास्तन्मतेऽपि कल्प्यतयाऽऽश्रयतासंसर्गकबोधे तत्संसर्गकयोग्यताज्ञानहेतुतायां अधिकायास्तन्मते कल्पनीयत्वात्।

ननु जानातीत्यानुपूर्वीज्ञानजाधातुजन्यज्ञानोपस्थित्यादिघटितशाब्दसामग्र्या भिन्नविषयकप्रत्यक्षं प्रति प्रतिबन्धकतायामाश्रयत्वोपस्थितिनिवेशस्याधिक्याद् गौरवमिति चेत्, न; संसर्गतामते "ज्ञानाश्रयत्ववान् चैत्रः सुन्दरः" "निरूपितत्वसम्बन्धावच्छिन्नप्रतियोगिताकज्ञानाभाववदाश्रयत्वं प्रमेयम्" इति प्रत्यक्षयोः "जानाति चैत्रः" इत्यानुपूर्वीज्ञानादिघटितशाब्दसामग्र्याः पृथक् प्रतिबन्धकतायाः कल्पनीयतया, प्रकारतामते चाकल्पनीयतया प्रकारतामत एव लाघवात्॥

१८ प्रश्नः—आख्यातैकवचनस्य संख्यार्थकत्वं न वेति निरूप्य तस्य संख्यानार्थकत्वाभावे न्यायमते कर्तृकर्मपदोत्तरं तृतीयादिनियामकं निर्मलं निरूपयत ?

आख्यातैकवचनं न संख्याबोधकम्; चैत्रः पचतीत्यादौ सुब्विभक्तेरेवार्थस्यैकत्वस्य चैत्रादान्वयसम्भवात् तिबेकवचनस्य एकत्वशक्तत्वानभ्युपगमात्।

न च 'तिबेकवचनमेकत्वशक्तम्, एकवचनत्वात् सुबेकवचनवत्' इत्यनुमानेनाख्यातैकवचनेऽपि एकत्वशक्तता स्यादिति वाच्यम्; अप्रयोजकत्वात्, व्यभिचारशङ्काविघटकतर्कस्याभावात्। आख्यातद्विवचनादिकं तु अवश्यमेव संख्याबोधकम्, अन्यथा 'चैत्रौ मैत्रश्च गच्छतः' इत्यादौ

चैत्रमैत्रादौ द्वित्वबोधानुपपत्तेः, चैत्रादिपदोत्तरं द्वित्वबोधकसुब्भिभक्तेरसत्त्वात् इति चेत् ? अत्र वैयाकरणाः—

"आख्यातस्य कर्तरि शक्तिर्नैयायिकैर्न स्वीक्रियते, लाघवात् कृतावेव तेषां मते आख्यातसामान्यशक्तिः। तथा च 'अनभिहिते कर्तरि तृतीया' इत्यनुशासनात् चैत्रः पचतीत्यादौ चैत्रपदोत्तरं तृतीया स्यात्, न स्यात्; यादृशाख्यातेन कर्तृगतसंख्यानभिहिता भवेत् तादृसाख्यातयोग एव तृतीया इत्यस्यैव नैयायिकैर्वक्तव्यतया पचतीत्यादावाख्यातैकवचनेन चैत्रादौ संख्याऽनभिहिता स्यात्, तदा चैत्रपदोत्तरं तृतीया स्यादित्यकामेनापि नैयायिकैराख्यातैकवचनस्थ संख्यार्थकत्वमभ्युपगन्तव्यम्" इत्याहुः।

तच्चिन्त्यम्; कर्तृसंख्यानभिधानं कीदृशम् ? यदि आख्यातार्थसंख्यानिष्ठप्रकारतानिरूपितचैत्रादिकर्तृनिष्ठविशेष्यताकबोधजनकतावच्छेदकानुपूर्वीशून्याख्यातकत्वमेव कर्त्रादौ तृतीयाविभक्तिप्रयोजकमुच्यते तदा सर्वत्रासम्भवः; निरुक्तबोधजनकत्वस्य स्वरूपयोग्यतारूपस्येव वक्तव्यतया सर्वत्राख्यातार्थ एव तादृशानुपूर्वीमत्त्वेन तच्छून्याख्यातस्याप्रसिद्धत्वात्। यदि चाख्यातार्थसंख्याप्रकारककर्तृविशेष्यकबोधजनकत्वप्रकारकतात्पर्यविशेष्यताशून्यत्वमेव तादृशानभिधानम्, तदा चैत्रः पचतीत्यादौ आख्यातस्यापि चैत्रादौ सुबर्थैकत्वबोधजनकतया तात्पर्यविषयत्वाभ्युपगमान्न चैत्रादिपदोत्तरं तृतीयापत्तिरित्याख्यातैकवचनस्यैकत्वशक्तानभ्युपगमेऽपि नैयायिकानां किमपि नापचीयते॥

१६ प्रश्नः—धात्वर्थविषये विवदमानयोः प्राचीननवीनयोर्मते संक्षेपेण पृथगुपपाद्य फलावच्छिन्नव्यापारे फलव्यापारयोर्वा खण्डशः शक्तिः स्वीकरणीयेति लेख्यम् ?

प्राचीनमते धातोर्व्यापारमात्रमर्थः, फलं द्वितीयार्थः, कर्मप्रत्ययासमभिव्याहृतत्यागादिपदस्य च तत्तत्फलावच्छिन्नव्यापारे निरूढलक्षणा, अतस्त्यागगमनपदयोर्नाविलक्षणबोधजनकता। सकर्मकत्वं च फलान्वितव्यापारबोधकत्वमिति।

नव्यमते च संयोगादिरूपफलविशेषावच्छिन्नव्यापारो गम्याद्यर्थः, तद्धात्वर्थतावच्छेदकफलशालित्वमेव तद्धातुकर्मत्वम्। 'कर्मणि द्वितीया' इति सूत्रस्य कर्मणि फलनिष्ठाधेयत्वान्वयिनि प्रकृतितात्पर्ये तदुत्तरं द्वितीयेत्यर्थः। द्वितीयार्थं आधेयत्वम्, तस्य धात्वर्थतावच्छेदकफलेऽन्वयः। गमनं न स्पन्द इत्यादितो धात्वर्थतावच्छेदकफले स्पन्दभेदान्वयबोधवारणाय तद्विशेष्यकवृत्तिज्ञानजन्यतदुपस्थितिः कारणम्, तज्जन्यतावच्छेदककोटौ च तादृशोपस्थित्यव्यवहितोत्तरत्वनिवेशनमावश्यकम्; एकपदाधीनतद्विषयकशाब्दबोधे पदान्तरवृत्तिज्ञानजन्यतदुपस्थितेर्व्यभिचारस्य प्रकारान्तरेणावारणात्॥ इति॥

फले व्यापारे च पृथक् शक्त्युपगमे शाब्दसामग्याः प्रतिबन्धकतायां विशिष्टविषयकोपस्थितिस्थले उपस्थितिद्वयकल्पने गौरवम्, परन्तु कर्मप्रत्ययस्थले फलस्य द्विधा भानं चेदनुभवविरुद्धं तदा पुनरगत्या शक्तिद्वयमेव धातोः स्वीकरणीयम्, इति संक्षेपः।

अत्रेदं विचार्यते—व्यापारमात्रस्य धात्वर्थतापक्षेऽपि सर्वदोषाणां वारणात् फलावच्छिन्नव्यापारे शक्तिकल्पनमनुचितम्, फले द्वितीयादेः शक्त्यन्तरकल्पनापेक्षया धातोर्विशिष्टशक्तिकल्पने लाघवेऽपि आधेयत्वे द्वितीयादेः शक्त्यन्तरकल्पनेन साम्यमेव। 'ग्राममध्यास्ते' इत्यादौ द्वितीयायाः सर्वमत एवाधेयत्वबोधकत्वेऽपि प्राचीनमते आधेयत्वे द्वितीयाया लक्षणैव। अथवाऽऽधेयत्वेऽपि द्वितीयाया लक्षणैवास्तु। द्वितीयादेः फलबोधकतामतेऽपि फले लक्षणास्वीकारे तु प्राचीनमते धातुजन्यशुद्धव्यापारोपस्थितेः शाब्दबोधहेतुत्वकल्पनेन गौरवम्। फलावच्छिन्नव्यापारे शक्तिकल्पनं तु द्वितीयाद्यसमभिव्याहारस्थले फलावच्छिन्नव्यापारे धातुलक्षणासमशीलम्। गच्छतीत्यादितः शक्तिभ्रमात् शुद्धव्यापारबोधस्यानुभविकत्वेऽपि शाब्दबुद्धौ द्वितीयाजन्यफलोपस्थितेः कारणतायाः कल्पनाऽऽधिक्यं प्राचीनमते।

नव्यमते तु समानविषयकानुमित्यादिकं प्रति शाब्दसामग्याः प्रतिबन्धकत्वे फलप्रकारतानिरूपितव्यापारनिष्ठविशेष्यताशालित्वेन

व्यापारविशेष्यतानिरूपितफलप्रकारताशालित्वेन वा विनिगमनाविरहाद् धातुजन्योपस्थितेर्निवेशनीयतया सामग्रीप्रतिबन्धकताधिक्यमवच्छेदकगौरवं च । किं च नव्यमते शाब्दबोधस्याधिकविषयतया तात्पर्यज्ञानादिकमपि अधिकविषयमेव शाब्दसामग्रीप्रतिबन्धकतायामन्तर्भविष्यतीति गौरवम् ।

न च फलस्य द्वितीयार्थत्वे भूमिं गच्छति न महीरुहमित्यादौ महीरुहवृत्तिसंयोगादेर्जनकतासम्बन्धावच्छिन्नाभावस्याप्रसिद्धिरिति वाच्यम्; कालिकादिसम्बन्धावच्छिन्नग्रामादिवृत्तिसंयोगादिकमादायातिप्रसंगवारणाय समवायसम्बन्धावच्छिन्नाधेयत्वस्य द्वितीयार्थतया वाच्यतया 'द्रव्यं गच्छति नाभावम्' इत्यादौ नव्यमतेऽप्यप्रसिद्धयापत्तेः ।

वस्तुतस्तु शाब्दबोधस्याधिकविषयत्वे लाघवस्य स्वत्वादेः संसर्गतानिराकरणावसरे दर्शितत्वादत्रापि नव्यमते एव लाघवम् । तथाहि—ग्रामं गच्छतीत्यादौ ग्रामनिरूपितत्वाभाववदाधेयत्वमाधेयत्वाभाववत् फलं फलाभाववद् व्यापारादींश्च बाधादीन् प्राचीनमते द्वितीयार्थफलाभावव्याप्यतयोपादाय तद्वन्निश्चयाभावस्य शाब्दसामग्र्यां निवेशेन महद् गौरवम् इति ॥

२० प्रश्नः—'घट आकाशं न पश्यति' इति वाक्यात् कीदृशोऽन्वयबोधः कथं जायते ? इति विशदमुच्यताम् ।

दृश्यादिसमभिव्याहृतद्वितीयाया लौकिकविषयितार्थकत्वे आकाशनिरूपितलौकिकविषयिताया अप्रसिद्ध्या 'आकाशं न पश्यति' इत्यादौ वाक्यार्थाप्रसिद्धिः । लौकिकविषयितायां निरूपितत्वसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावबोधस्तु न सम्भवति, वृत्त्यनियामकसंसर्गस्य संसर्गाभावप्रतियोगितानवच्छेदकत्वात् । अत एव निरूपकतासम्बन्धावच्छिन्नप्रतियोगिताकचाक्षुषादिनिष्ठलौकिकविषयित्वाभावोऽपि न प्रत्येतुं शक्यते; प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधनियमस्य भंगप्रसंगात् चाक्षुषादिनिष्ठलौकिकविषयितात्वावच्छिन्नस्यानुपस्थितत्वाच्च । भावा-

न्वयबोधे लौकिकविषयिताप्रकारेण चाक्षुषस्य भानम्, अभावान्वय-बोधे च चाक्षुषप्रकारेण लौकिकविषयिताभानमिति चानुभवविरुद्धम्। किं च 'आकाशं पश्यति चैत्रः' इत्याकारकवाक्यजन्यबोधदशायामाकाशं न पश्यति चैत्र इति वाक्याच्छाब्दबोधप्रसङ्गः। 'आकाशं पश्यति मैत्रः इति भ्रमदशायाम् 'आकाशं न पश्यति चैत्रः' इति वाक्यात् शाब्दबोध-स्यानुभवसिद्धत्वेन लौकिकविषयितात्वसामानाधिकरण्येनैवाकाशाभाव-बोधस्य स्वीकर्तव्यतया लौकिकविषयितात्वसामानाधिकरण्येनाकाश-निरूपितत्वावगाहिनो ज्ञानस्याप्रतिबन्धकत्वात्।

चैत्रीयचाक्षुषादिनिष्ठलौकिकविषयतात्वावच्छेदेन तादृशाभावबोध-स्तु न सम्भवति; तादृशविषयतात्वेन विषयताया अनुपस्थितेः। आकाश-पदस्याकाशनिरूपितत्वे लक्षणां स्वीकृत्य नञर्थस्य द्विधा भानोपगमेना-श्रयतासम्बन्धावच्छिन्नप्रतियोगिताकाकाशादिनिरूपितत्वाभाववल्लौकिक विषयताशालिचाक्षुषाश्रयत्वाभाववान् घट इत्यपि बोधो न युज्यते। चैत्रो घटं न पश्यति, मैत्र आकाशं न पश्यतीत्यादिवाक्यजन्यशाब्द-बोधस्याविलक्षणस्य सर्वानुभवसिद्धस्यानुपपत्तेः। अत्रापि तादृश-बोधस्वीकारे तु चैत्रो यदा घटादिकं न पश्यति, अपि तु पटादिकमेव, तत्रापि 'चैत्रो घटं न पश्यति इत्यनुभवसिद्धप्रयोगस्यानुपपत्तेः। किं च यदा भावमात्रं पश्यति चैत्रस्तदा 'भावं न पश्यति चैत्रः' इति प्रयोगा-पत्तिः; भावानिरूपितलौकिकविषयिताशालिचाक्षुषाश्रयत्वाभावस्य वाक्यार्थस्याबाधितत्वात्।

यत्तु अलौकिकविषयिताशून्यचाक्षुषत्वाद्यवच्छेदेनाकाशादिविषय-कत्वघटादिवृत्तित्वोभयाभावः घटं आकाशं न पश्यतीति वाक्याद् बोध्यते। अलौकिकविषयिताशून्यत्वनिवेशादुपनीया(ज्ञानलक्षणासंनि-कर्षभासमाना)काशादिविषयकचाक्षुषे आकाशादिविषयकत्वचैत्रादि-वृत्तित्वोभयसत्त्वेन चैत्र आकाशं न पश्यतीति प्रयोगस्य नानुपपत्तिः, न वा घटादौ तादृशचाक्षुषाद्याश्रयत्वभ्रमदशायां घट आकाशं न पश्य-तीति वाक्याच्छाब्दबोधानुपपत्तिः। अलौकिकविषयिताशून्यत्वस्थाने

लौकिकत्वविशेषणदाने तु आकाशविषयकचाक्षुषाद्युपनीतभानस्यापि यदा इतरांशे लौकिकत्वं तदा प्रागुक्तानुपपत्तितादवस्थ्यम्। अतोऽलौकिकविषयताशून्यत्वमेव विवक्षितम्। अलौकिकविषयिताशून्यचाक्षुषत्वाद्यवच्छिन्नं च लक्षणया दृश्धातोरर्थः, विषयतासामान्यं निरूपकत्वं च द्वितीयार्थः, आश्रयत्वं द्वित्वं निरूपकत्वं चाख्यातार्थः, निष्ठत्वसम्बन्धेनाश्रयत्वे प्रथमान्तपदार्थघटादेस्तस्य निरूपकत्वे विशेषणतयाऽन्वयः। तादृशनिरूपकत्वाकाशादिविषयकत्वयोश्च द्वित्वेऽन्वयः, तादृशोभयस्य च द्वित्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन नञर्थाभावेऽन्वयः। तस्य धात्वर्थेऽन्वयः। अथवा–स्वनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपव्यापकतासम्बन्धेन तादृशोभयाभावेऽन्वयः, तस्याख्यातार्थनिरूपकत्वे तस्य च प्रथमान्तपदार्थघटादावन्वयः। एवं च शाब्दबोधस्य प्रथमान्तपदार्थमुख्यविशेष्यकत्वनियमस्यापि न हानिरिति।

तदपि न; घटादिविषयकचाक्षुषादेः कालिकादिसम्बन्धेन घटादिवृत्तितया घटो घटं न पश्यतीति प्रयोगानुपपत्तिवारणाय समवायेन घटादिवृत्तित्वाकाशादिविषयकत्वोभयाभावस्य स्वीकरणीयत्वेऽभाव आकाशं न पश्यतीत्यादौ वाक्यार्थाप्रसिद्धेः, अभावस्यासमवेतत्वात्।

वस्तुतस्तु घट आकाशं न पश्यतीत्यादिवाक्यानामगत्याऽप्रामाण्यमेवोपगम्यते॥

२१ प्रश्न :—तृतीयाद्वितीयानियामकं तथा निर्वाच्यं यथा 'पक्वानि भुङ्क्ते चैत्रः', 'ओदनः पक्त्वा भुज्यते' इत्यादौ चैत्रौदनपदोत्तरं तृतीयाद्वितीययोः प्रसक्तिः, 'चैत्रेण दृश्यमानं घटं मैत्रः पश्यति' इत्यत्र घटपदोत्तरं द्वितीयाया अनुपपत्तिश्च न स्याताम् ?

ननु समभिव्याहृतपदेन कर्तृकर्मत्वानभिधानस्य तृतीयाद्वितीयानियामकत्वेन पक्वानि भुङ्क्ते चैत्रः, ओदनः पक्त्वा भुज्यते इत्यादौ कृता कर्तृत्वकर्मत्वयोरनभिधानात् चैत्रोदनपदोत्तरं तृतीयाद्वितीये स्यातामिति चेत्, न; कर्तृकर्मत्वयोः समभिव्याहृतपदाभिहितत्वसामान्याभावस्यैव

तृतीयाद्वितीयानियामकत्वात्, उक्तस्थलयोश्च कर्तृकर्मत्वयोराख्यातेनाभिहिततया समभिव्याहृतपदाभिहितत्वसामान्याभावस्याभावेनादोषात् ।

न च तथापि ज्ञानभेदेन विषयताभेदस्यास्वीकारात् चैत्रेण दृश्यमानं घटं मैत्रः पश्यतीत्यत्र चैत्रदर्शनमैत्रदर्शनोभयनिरूपितविषयत्वरूपकर्मतायाः शानच्प्रत्ययरूपेण कृताऽभिहितत्वेन द्वितीयानुपपत्तिरिति वाच्यम्; तत्तत्प्रातिपदिकार्थनिष्ठविशेष्यतानिरूपितविशेषणत्वमात्रेण समभिव्याहृतपदेन कर्तृत्वकर्मत्वादिविवक्षाया अभावस्यैव तृतीयाद्वितीयानियामकत्वस्वीकारात्, उक्तस्थले च मैत्रदर्शननिरूपितविषयत्वरूपकर्मताया घटपदार्थविशेष्यतयापि विवक्षितत्वेन घटप्रातिपदिकार्थविशेषणत्वमात्रेण कर्मत्वविवक्षाया अभावस्य सत्त्वेन द्वितीयायाः साधुत्वात् ॥

२२ प्रश्नः—धात्वर्थतावच्छेदकफलाश्रयत्वरूपकर्मत्वस्य कर्तृसाधारण्येन चैत्रः स्वं गच्छतीति प्रयोगस्य कुतो न प्रामाण्यम् ? विहगो विहगं गच्छतीति प्रयोगश्चापाद्य निराक्रियताम् ?

ननु गम्धात्वर्थतावच्छेदकसंयोगरूपकर्मत्वस्य ग्रामादाविव स्वस्मिन्नपि सत्त्वेन ग्रामं गच्छतीतिवत् स्वं गच्छतीति प्रयोगोऽपि प्रामाणिकः स्यादिति चेन्न; भिन्नसमवेतत्वस्यापि द्वितीयार्थत्वात्, तथा च स्वनिष्ठसंयोगजनकक्रियायाः स्वभिन्नसमवेतत्वाभावेन शङ्कितप्रयोगासम्भवात् ।

न च स्वस्मिन्नपि द्वित्वावच्छिन्नभेदमादाय स्वाभिन्नत्वस्य सत्त्वेन स्वभिन्नसमवेतस्वनिष्ठसंयोगजनकक्रियायाः स्वस्मिन् निर्वाहतयोक्तप्रयोगापत्तिर्दुर्वारेति वाच्यम्, क्रियान्वयिनो भेदप्रतियोगितावच्छेदकत्वस्यैव द्वितीयार्थत्वात्; तथा च स्वस्मिन् स्वनिष्ठभेदप्रतियोगितावच्छेदकक्रियाश्रयत्वस्याभावेन तथा प्रयोगासम्भवात् ।

न चैवमपि विहगो विहगं गच्छतीति प्रयोगापत्तिर्दुर्वारेति वाच्यम्; विहगवृत्तित्वविशिष्टसंयोगरूपस्य विहगोत्तरद्वितीयार्थस्य क्रियायां जनकत्वस्वाश्रयनिष्ठभेदप्रतियोगितावच्छेदकत्वोभयसम्बन्धेनान्वयोपगमात् विहगनिष्ठक्रियाया जनकतासम्बन्धेन तद्विहगवृत्तिसंयोगवत्त्वेऽपि तद्विहगनिष्ठभेदप्रतियोगितावच्छेदकत्वाभावेन दोषाभावात् ॥

२३ प्रश्नः—घ्राधातुसमभिव्याहृतद्वितीयाया अर्थो निरूप्यताम् ?

घ्राधातोः 'घ्रा गन्धोपादाने' इत्यनुशासनानुसारं गन्धलौकिकप्रत्यक्षत्वं शक्तावच्छेदकम्, एवं च पुष्पं जिघ्रतीति वाक्यात् 'पुष्पवृत्तिगन्धविषयकलौकिकप्रत्यक्षाश्रयतावान्' इत्याकारकः शाब्दबोधः। आमोदमुपजिघ्रतीत्यादिस्थले च गन्धाविशेषितस्यैव प्रत्यक्षविशेषस्य लक्षणया घ्राधात्वर्थता उपगम्यते, अतो न तत्प्रयोगस्याप्रामाण्यापत्तिः। 'आघ्रातवान् गन्धवहं सुगन्धम्' इत्यत्र चोपाधिनिष्ठगन्धग्रहतात्पर्येणैव घ्राधातोः प्रयोगः। अतस्तत्र गन्धे गन्धवहवृत्तित्वस्य बाधेऽपि न क्षतिः।

अयं भावः—आधेयत्वनिष्ठसांसर्गिकविषयतानिरूपिताप्रकारता एव पुष्पं जिघ्रतीत्यादौ द्वितीयार्थः। तस्याश्च गन्धनिरूपितलौकिकविषयिताशालिप्रत्यक्षात्मकघ्राधात्वर्थैकदेशे विषयितायां निरूपितत्वसम्बन्धेनान्वयः। उक्तद्वितीयार्थे च प्रकृत्यर्थस्य निरूपितत्वसम्बन्धेनान्वयः। तथा च तद्वाक्यात् पुष्पनिरूपितताद्दशप्रकारतानिरूपितगन्धीयलौकिकविषयिताशालिप्रत्यक्षाश्रयतावान् इति बोधः। 'आघ्रातवान् गन्धवहं सुगन्धम्' इत्यत्र च गन्धवहनिरूपिततादृशप्रकारतानिरूपितगन्धीयलौकिकविषयिताशालिप्रत्यक्षाश्रयतावान् इति बोधः।

विशेषश्चोभयोः स्थलयोरयम्—पूर्वस्थले शाब्दबोधविषयीभूतं प्रत्यक्षं पुष्पे गन्ध इत्याकारकं प्रमा, द्वितीयस्थले च गन्धवहे गन्ध इत्याकारकमप्रमा ॥ इति ॥

वाक्यपदीयप्रकाशः

१ प्रश्नः—धर्मस्यागमेतराविषयत्वम्, आर्षज्ञानस्यानुमानाद्यबाध्यत्वं च वाक्यपदीयरीत्या व्यवस्थाप्यताम्?

पूर्वं साधुशब्दस्य धर्मजनकत्वे तदर्थं (साधुशब्दव्यवस्थार्थं) व्याकरणरूपागमापेक्षोक्ता। तत्रेयं विप्रतिपत्तिः—'अक्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्' इति न्यायेन व्याकरणरूपमागमं विनापि शिष्टप्रयोगरूपानुमानेनैव साधुशब्दव्यवस्थितौ सत्याम् अलं तदर्थं व्याकरणेनागमेन इति चेन्न; धर्मादीनामदृष्टत्वेन यागस्वर्गयोर्व्याप्यव्यापकभावस्य क्वाप्यगृहीतत्वेन व्याप्तिग्रहाभावात् तद्बलेन प्रवर्तमानस्यानुमानस्य धर्मविषयेऽप्रसरात्।

न च लौकिकानां चर्मचक्षुषादृष्टधर्मादिनिर्णायकसामर्थ्याभावेऽपि आर्षचक्षुषां प्रातिभज्ञानवतां महर्षीणां विशेषसामर्थ्यवत्त्वेन तद्बलेन अतीन्द्रियार्थविषयकज्ञानेन व्याप्तिग्रहे तदनुमानेन धर्मज्ञानं स्यादिति वाच्यम्; ऋषीणां तादृशस्यातीन्द्रियार्थविषयकस्य प्रातिभस्य ज्ञानस्यागमाधीनत्वेनान्योऽन्याश्रयापत्तेः।

अपि च अवस्थादेशकालभेदात् पदार्थानां शक्तिभेददर्शनात्, पदार्थनिष्ठानां तासां शक्तीनां ज्ञानं तत्तच्छक्तिभेदभिन्नानां पदार्थानां च ज्ञानं नागममन्तरा केवलतर्केण संभवि। तथाहि—दाहादिकं प्रति निर्ज्ञातशक्तेर्वह्न्यादिद्रव्यस्य प्रतिबन्धकादिमणिसद्भावे व्यभिचारदर्शनात् नानुमानेन तज्ज्ञानसम्भवः।

किं च—अनुमानस्य प्रतिपुरुषं भिन्नत्वेनाव्यवस्थितत्वेन च नानुमानेन केवलेन कस्यापि वस्तुनो निर्णयः सम्भवति, तथा हि—कुशलैरप्यनुमातृभिः कणादादिभिः परमाणोर्जगत्कारणत्वनिर्णयेऽपि अन्यैरनुमातृभिः कपिलादिभिः प्रकृतिं जगत्कारणत्वेनातिष्ठमानैस्तदनुमानमन्यथाकृत्य

निराक्रियते इति नानुमानेन शुष्केण कस्यापि वस्तुनो निर्णयः। परैरसमाख्येयस्य मणिरूप्यादितारतम्यविज्ञानस्य मणिविदां यज्ज्ञानं तदपि नानुमानसाध्यम्, अपि तु अभ्याससाध्यमिति विज्ञेयम्। तस्माल्लौकिकानामपि वस्तूनामव्यवस्थितेन तर्केण ज्ञानासम्भवात् क्वालौकिकेषु अदृष्टेषु धर्मादिषु निर्णयार्थमनुमानस्य प्रसर इति धर्मनिर्णये सर्वथा प्रतिरुद्धगतिस्तर्क इति।

तच्च ऋषीणामार्षं ज्ञानं प्रत्यक्षमेव। ऋषीणां प्रातिभज्ञानबलेन अस्मदादिवत् अतीन्द्रियाणां व्यवहितानां विप्रकृष्टानामतीतानागतानां च वस्तूनां प्रत्यक्षत्वात्।

न च तेषां ज्ञानस्य प्रत्यक्षत्वेऽपि इन्द्रियासम्बद्धविषयकत्वेन शुक्तिरजतादिज्ञानवत् कथं नानुमानेन बाध इति वाच्यम्; चक्षुरादीन्द्रियैरग्राह्यानपि व्यवहितविप्रकृष्टातीतानागतादिविषयान् ये प्रातिभेन ज्ञानेन चक्षुषा प्रत्यक्षमिव पश्यन्ति तेषां प्रातिभज्ञानवतां महर्षीणां तस्य ज्ञानस्य लौकिकप्रत्यक्षमूलकेनानुमानेन कथमपि बाधितुमशक्यत्वात्।

एतदेवाभिसन्धाय भर्तृहरिणोक्तम्—

'अतीन्द्रियानसंवेद्यान्.....कथमन्यो निवर्तयेत्॥ इति॥

२ प्रश्नः—'स्वं रूपम्' इति सूत्रमुपजीव्य संज्ञासंज्ञिभावे हर्युक्ताः पक्षाः प्रदर्शनीयाः ?

'स्वं रूपं शब्दस्याशब्दसंज्ञा' इति सूत्रे केचिदभियुक्ता व्यक्तिं संज्ञां जातिं च संज्ञिनीं प्रतिपद्यन्ते। तथा च शास्त्रे शब्दसंज्ञां वर्जयित्वा शब्देन जातेर्बोधो भवति।

नन्वेवम् 'अग्नेर्ढक्' इत्यत्राग्निशब्देन जातेर्बोधे, जात्या च सह ढक्प्रत्ययस्य पौर्वापर्यासम्भवात् कथं तत्रोपपत्तिरिति चेत् ? न; व्यक्तिद्वारा जातेस्तत्तत्कार्यसम्बन्धेन जातौ व्यक्तिद्वारकस्य प्रकृतिप्रत्ययपौर्वापर्यस्य सम्भवेनानुपपत्तेरभावात्। तदुक्तम्—

स्वं रूपमिति कैश्चित्तु व्यक्तिः संज्ञोपदिश्यते।
व्यक्तेः कार्याणि संसृष्टा जातिस्तु प्रतिपद्यते॥ इति।

अपरे तु—तद्विपरीतं व्यक्तिं संज्ञिनीं जातिं च संज्ञामाचक्षते। तथा च 'अग्नेर्ढक्' इत्यादिषु जात्याः अग्निशब्दत्वादिजात्या संज्ञया

बोधिताऽग्निशब्दरूपा व्यक्तिर्दहनादिकार्यं प्रतिपद्यते इति न काप्यनुपपत्तिः। तदप्युक्तं हरिणा—

संज्ञिनीं व्यक्तिमिच्छन्ति सूत्रग्राह्यामथापरे।
जातिप्रत्यायिता व्यक्तिः प्रदेशेषूपतिष्ठते॥ इति॥

उद्द्योतकारा अपि संज्ञासंज्ञिनोः सामानाधिकरण्यदर्शनात् जातिविशिष्टे शब्दे जातेः संज्ञात्वं व्यक्तेश्च संज्ञित्वमिच्छन्ति।

उभयस्मिन्नपि पक्षे न कोऽपि फलभेदः, किन्तु पूर्वत्र जातेः प्राधान्यम्, उत्तरत्र च व्यक्तेः प्राधान्यम्॥ इति॥

३ प्रश्नः—ध्वनिना स्फोटस्य ग्रहणाय के के संस्क्रियन्ते इति सदृष्टान्तमुपपाद्यताम्?

शब्दाभिव्यक्तिवादिनां शब्दाभिव्यक्तिविषये मतत्रयम्—

१. केचित् यथा समाधानाञ्जनादिभिः सूक्ष्मव्यवहितविप्रकृष्टोपलब्धौ चक्षुष एव संस्कारो न वस्तुनः (विषयस्य), तथा ध्वनिभिः शब्दग्राहकस्य श्रोत्रेन्द्रियस्यैव संस्कारो न शब्दस्य, तथा सति तस्य विभुत्वेन सर्वश्रोत्रसम्बद्धतया सर्वपुरुषैस्तद्ग्रहणापत्तेः—तदुक्तम्। 'तत्र सर्वैः प्रतीयेत शब्दः संस्क्रियते यदि' इत्याहुः।

२. परे तु यथाऽऽतपेन विषयस्य तैलादेर्गन्धस्य संस्कारः, यथा वा उदकेन आतपशुष्कायाः पृथिव्या गन्धस्य संस्कारो न तु घ्राणस्य, तथा सति संस्कृतासंस्कृतयोः पृथिवीगन्धयोर्भेदाभावापत्तेः, तथा ध्वनिभिरपि शब्दस्य विषयस्यैव संस्कारः क्रियते न तु श्रोत्रेन्द्रियस्य, तथा सति श्रोत्रेण सर्वशब्दग्रहणापत्तेः। तदुक्तम्—

सकृच्च संस्कृतं श्रोत्रं सर्वशब्दान् प्रबोधयेत्।
घटायोन्मीलितं चक्षुः पटं न हि न बुध्यते॥

इति वदन्ति।

३. अन्ये तु यथा चक्षुषः प्राप्यकारित्वेन विषयदेशं गत्वा विषयग्राहकत्वे तेजसा आलोकेन द्वयोरपि विषयेन्द्रिययोरेकदेशत्वेन उभयोः संस्कारः क्रियते, तत्र च यथाऽऽलोकेन विषये तयोरूपावरणनिवृत्तिरूपः, चक्षुषि च चक्षूरश्मिवर्धनरूपः संस्कारः क्रियते; तथा ध्वनिभिरपि शब्दे

शब्दावारकस्थिरवाय्वपसारणरूपः श्रोत्रे च श्रोत्रमभिव्याप्य स्थितस्य कौष्ठ्यस्य वायोरपसारणरूपः संस्कारः क्रियते।

एतदेव मतत्रयं वाक्यपदीयकारेण प्रतिपादितम्—

इन्द्रियस्यैव संस्कारः समाधानाञ्जनादिभिः।
विषयस्य तु संस्कारस्तद्गन्धप्रतिपत्तये॥
चक्षुषः प्राप्यकारित्वे तेजसा तु द्वयोरपि।
विषयेन्द्रिययोरिष्टः संस्कारः स क्रमो ध्वनेः॥ इति॥

४ प्रश्नः—ध्वनेः स्फोटस्य च व्यधिकरणत्वात् व्यञ्जकदीपगतधर्माणां व्यङ्ग्ये घटादावनुपलब्धेश्च प्राप्तो व्यङ्ग्यव्यञ्जकभावाभावो निरस्यताम्?

पूर्वं स्फोटस्य व्यङ्ग्यत्वं प्राकृतादिध्वनेश्च तद्व्यञ्जकत्वमुक्तम्, परं नैतद् घटते; व्यङ्ग्यव्यञ्जकयोः समानदेशस्थत्वनियमात्। तथाहि—समानदेशस्थानां घटादीनां समानदेशस्थैर्दीपादिभिर्व्यङ्ग्यत्वं भवति, तथा च यत्र यत्र व्यङ्ग्यव्यञ्जकभावस्तत्र तत्र समानदेशस्थत्वमिति व्याप्त्या समानदेशस्थत्वस्य व्यङ्ग्यव्यञ्जकभावव्यापकत्वे सिद्धे व्यापकाभावे व्याप्याभावनियमात् यत्र समानदेशस्थत्वाभावस्तत्र व्यङ्ग्यव्यञ्जकभावः स्यात्। प्रकृते च ध्वनेस्तालवादिव्यापारजन्यस्य श्रोत्रदेशस्थत्वेन स्फोटस्य चान्तरहृदयदेशस्थत्वेन भिन्नदेशस्थत्वात् तमोर्व्यङ्ग्यव्यञ्जकभावस्याप्यभावः प्रसज्येतेति चेन्न; परिच्छिन्नपरिमाणवतां मूर्तानां घटादीनामेव देशादिभिः सम्बन्धत्वनियमेन अमूर्तस्य शब्दस्य व्यापकत्वात् 'यत्र यत्र समानदेशस्थत्वं तत्र तत्र व्यङ्ग्यव्यञ्जकभावः' इति नियमाप्रवृत्त्या ध्वनिस्फोटयोर्व्यङ्ग्यव्यञ्जकभावनियमाक्षतेः। व्यापकेऽपि शब्दे उपाधिमादाय औपाधिकदेशसम्बन्धस्वीकारेऽपि च श्रोत्रदेशस्थितस्य ध्वनेः श्रोत्रद्वारा हृदयदेशगमनेन ध्वनिस्फोटयोः हृदयरूपसमानदेशत्वेन व्यङ्ग्यव्यञ्जकभावाक्षतिः। तदुक्तं भाष्ये—"श्रोत्रपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्दः, एकं च पुनराकाशम्" इत्यादि। एतदभिसन्धायोक्तं हरिणा—

देशादिभिश्च सम्बन्धो दृष्टः कायवतामिह।
देशभेदविकल्पेऽपि न भेदो ध्वनिशब्दयोः॥ इति॥

न चेवमपि लोके व्यञ्जकस्य दीपकस्य वृद्धिह्रासाभ्यां व्यङ्ग्यस्य घटादेर्वृद्धिह्रासादर्शनात् प्रकृते च अभिव्यञ्जकस्य प्राकृतध्वनेर्वृद्धिह्रासाभ्यां स्फोटस्य वृद्धिह्रासयोः ध्वनिभेदेन स्फोटभेदस्य च दीपघटयोस्तथाऽदर्शनेऽपि दर्शनात् कथमिह व्यङ्ग्यव्यञ्जकभाव इति चेत्? तैलोदकादिप्रतिबिम्बके तैलोदकादिव्यञ्जकानां भेदेन व्यङ्ग्ये मुखे लघुदीर्घवर्तुलत्वादिभेददर्शनेन लोके व्यञ्जकभेदेन व्यङ्ग्यभेदस्य दृष्टचरत्वात् प्रकृतेऽपि ध्वनिभेदेन स्फोटभेदे व्यङ्ग्यव्यञ्जकभावाक्षतिः।

एतदेवाभिसन्धायोक्तं भर्तृहरिणा—

प्रकाशकानां भेदांश्च प्रकाश्योऽर्थोऽनुवर्तते।
तैलोदकादिभेदेऽपि प्रत्यक्षं प्रतिबिम्बके॥ इति॥

५ प्रश्न—भर्तृहरिसम्मतानि प्रमाणानि निर्दिश्य तेषु कतमस्य प्राबल्यमिति वाक्यपदीयवाक्योपन्यासेन निरूपणीयम्?

वाक्यपदीयकारः सांख्यवृद्धैरभिमतानि त्रीण्येव प्रमाणान्यङ्गीकुरुते। प्रमाणत्रयमेव वाक्यपदीयकारोऽभिमन्यते। तानि च प्रत्यक्षम्, अनुमानम्, आगमः शब्दापरपर्यायश्चेति। तथाहि—प्रत्यक्षस्य सर्वैव दार्शनिकैः प्रमाणवादिभिरङ्गीकृतत्वात् न तत्रानभिमतिर्वाक्यपदीयकारस्य सम्भाव्यते। उल्लेखोऽपि वाक्यपदीयकृतः प्रत्यक्षप्रमाणविषये उपलभ्यते।

तथाहि—

प्रत्यक्षमनुमानं च व्यतिक्रम्य व्यवस्थिताः।
पितृरक्षःपिशाचानां कर्मजा एव सिद्धयः॥
आविर्भूतप्रकाशानाम् अनुपप्लुतचेतसाम्।
अतीतानागतज्ञानं प्रत्यक्षान्न विशेष्यते॥
यो यस्य स्वमिव ज्ञानं दर्शनं नातिशङ्कते।
स्थितं प्रत्यक्षपक्षे तं कथमन्यो निवर्तयेत्॥ इति॥

एवमुपर्युक्तासु कारिकासु प्रत्यक्षस्य स्पष्टमुल्लेखात् आर्षज्ञानस्य प्रत्यक्षादविशेषताप्रतिपादनाच्च प्रत्यक्षप्रमाणं वाक्यपदीयकारसम्मतमिति स्पष्टं प्रतीयते। एवं तर्कापरपर्यायेऽनुमानप्रमाणविषयेऽपि—'प्रत्यक्षमनु-

मानं च व्यतिक्रम्य व्यवस्थिताः', 'वेदशास्त्राविरोधी च तर्कश्चक्षुरपश्यताम्', 'रूपमात्राद्धि वाक्यार्थः केवलान्नावतिष्ठते', 'सतोऽविवक्षा पारार्थ्यं व्यक्तिरर्थस्य लैङ्गिकी', 'इति न्यायो बहुविधस्तर्केण प्रविभज्यते', 'कश्चित्तर्केण बाधते', 'अनुमानेन दुर्लभः' इत्यादिकारिकाः स्पष्टमेव प्रमाणानि। अस्ति चावश्यकता आगमसहकारित्वेनातीन्द्रियार्थज्ञानायानुमानप्रमाणस्य।

आगमप्रमाणं च प्रत्यक्षानुमानासंवेद्यानां धर्माधर्मादीनामतीन्द्रियाणामलिङ्गानां च वस्तूनां ज्ञानायावश्यकमेव। किं च 'आगमस्तमुपासीनो हेतुवादैर्न बाध्यते' इत्यादिभिर्वचनैरागमप्रमाणस्य तर्कात् प्राबल्यं बोधयद्भिः,

'धर्मस्य चाव्यवच्छिन्नाः पन्थानो ये व्यवस्थिताः।
न तान् लोकप्रसिद्धत्वात् कश्चित्तर्केण बाधते॥'

इत्यादिवचनैश्चागमप्रमाणस्य वाक्यपदीयकारसम्मतत्वम् स्पष्टं प्रतीयत एव।

एषु च त्रिषु प्रमाणेषु आगमस्यैव सर्वप्रमाणबलीयस्त्वं नेतरस्य कस्यापि। तथा हि—प्रत्यक्षस्येन्द्रियगोचरपदार्थविषयत्वेन नातीन्द्रियेषु पदार्थेषु तस्य प्रसरः। अनुमानस्यापि प्रत्यक्षमूलकत्वेन लिङ्गापेक्षत्वेन च न लिङ्गरहितेषु प्रत्यक्षामूलकेषु धर्माधर्मादिषु विषयेषु तस्य कथंचनापि प्रसरः। अपि च प्रत्यक्षानुमानयोः सम्भावितदोषतया, आगमस्य चापौरुषेयत्वेन असम्भावितदोषतया आगमस्य प्रत्यक्षानुमानापेक्षया प्राबल्यं स्वतःसिद्धमेव। वाक्यपदीयकारेण तु आगमविरुद्धं तर्कं प्रत्याचक्षाणेन प्रसाधितं विस्तरेणानुमानापेक्षायाऽऽगमस्य प्राबल्यम्। एतच्च (३०-४१ तमाभिः) कारिकाभिरवगन्तव्यम्।

किं च "शब्दप्रमाणका वयं, यच्छब्द आह तदस्माकं प्रमाणम्" इत्यादिभाष्योक्त्या शब्दप्रमाणकानां वैयाकरणानां मते आगमस्य प्राबल्यं निर्विवादमेव॥ इति॥

R. B. Rama Pandey

पुस्तकप्राप्तिस्थानानि

वाणीविलास प्रकाशन, कचौड़ीगली, वाराणसी

चौखम्भा अमरभारती प्रतिष्ठान, कचौड़ीगली, वाराणसी

चौखम्भा विद्याभवन, चौक, वाराणसी

मोतीलाल बनारसीदास, चौक, वाराणसी

श्री अम्बिका संस्कृत पुस्तकालय, शंकर आश्रम,
ज्वालापुर रोड, हरिद्वार